CC-0. Digitized by eGangotri and MIDF- Delhi

श्रीमहेन्द्रसंस्कृतविश्वविद्यालयग्रन्थमालायाः पञ्चपञ्चाशं पुष्पम्

मौतिवृत्तम्

भरतराजशर्मा मन्थलीयः

प्रकाशकः
महेन्द्रसंस्कृतविश्वविद्यालयः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रीमहेन्द्रसंस्कृतविश्वविद्यालयग्रन्थमालायाः पञ्चपञ्चाशं पुष्पम्

मौतिवृत्तम्

भरतराजशर्मा मन्थलीयः

प्रकाशकः

महेन्द्रसंस्कृतविश्वविद्यालयः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रकाशकः
महेन्द्रसंस्कृतविश्वविद्यालयः

प्रकाशनम्
२०५७ तमे वैक्रमाब्दे हरिबोधिन्यामेकादश्यां प्रथमं प्रकाशितम्

© प्रकाशनाधिकारः प्रकाशके सुरक्षितः

प्रकाशितपुस्तकानि - १००० प्रतिरूपाणि

मूल्यम् - रू. ८५।-

कम्प्यूटरटङ्कणम्
क्वालिटी लेजर प्रिन्ट, बागबजार,
दूरभाषसङ्ख्या (फोन नं.) २४२६५६

मुद्रकः
नेपाल प्रिन्टर्स एण्ड ट्रेडर्स सहकारी लिमिटेड
फोन : ४२७४५६,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

महेन्द्र संस्कृत विश्वविद्यालय
उपकुलपतिको कार्यालय

सम्मतिः

महेन्द्रसंस्कृतविश्वविद्यालयस्य प्रकाशनकार्यक्रमानुसारेण मुद्रितासु कृतिसु भरतराजमहोदयेन विरचितं मोतिवृत्तं नाम काव्यं वर्ण्यविषय-कलाविधानदृशा नितान्तमेवाभिनवं विभाव्यते । नेपालीभाषायाः साहित्यस्य माध्यमिककाले समुद्भूतस्य मोतिरामभट्टस्य जीवनमधिकृत्य रचितेऽस्मिन् प्रबन्धे काव्यकलायाः चरमोत्कर्षः समुपलभ्यते। काव्यमिदं भागद्वये विभक्तम् अस्ति । तत्र प्रथमभागे कविना मोतिराम-भट्टस्य जन्मतः पूर्वार्द्धस्य चरित्रं प्रस्तुतं विद्यते । वीरशम्शेरस्य शासनात्पूर्वं तेन यत् कार्यं कृतं तस्य चित्रणमत्र समुपलभ्यते । उत्तरार्धे च कविना लिखितानां काव्यानां तदीयान्यकार्याणाञ्च वैशिष्ट्यं निरूपितं प्राप्यते । नेपालीभाषाया साहित्यस्य च विकासाय तेन यानि कार्याणि कृतानि तेषां सम्यक् चित्रणं कविना कृतमस्ति प्रबन्धेऽस्मिन्। काव्यस्य प्रारम्भे कविना विष्णुवाचकस्य 'अ' शब्दस्य प्रयोगं विधाय मङ्गलाचरणं विहितम्। एतेन परम्परागतस्य मङ्गलाचरणविधानस्य निर्वाहः कविना प्रबन्धेऽस्मिन् विहितो दृश्यते। मोतिरामभट्ट एव प्रबन्धस्यास्य वर्तत आलम्बनविभावः। तत्कृतानां कार्याणां भूयोभूयो-ऽनुस्मरणेन मोतिरामभट्टविषयकः कविनिष्ठो भावः चरमत्कर्षतामत्रास्ति गमितः ।

भरतराजस्य काव्यशैली कविकुलगुरोः कालिदासस्य काव्यकलामनुसरति। कालिदासस्य काव्येष्विव तस्य काव्येषु चापृथक्यत्ननिर्वृत्तानामलङ्काराणामाभा प्रतिपद्यं विलसति । निदर्शनायाधः पद्यमेकं प्रस्तूयते –

बालः सबालो ववृधे कलेव
चन्द्रस्य चन्द्रस्य च वर्णचौरः ।
प्रतीक्षते स्म प्रतिभाऽस्य विद्यां
शिखां कृशानोरिव चन्द्रचुल्लिः ।।

अत्र प्रयुक्तानामुपमालङ्काराणां छटाः सहृदयानां मनो भृशं प्रीणयन्ति, मोतिराम-भट्टविषयकं कविनिष्ठभावञ्च सर्वथोपकुर्वन्ति । एतेन भरतराजस्योपमाविधानकौशलं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्फुटं परिलक्ष्यते । एवमेवोत्प्रेक्षालङ्कारविधाने कवेः कौशलं क्षणं निरीक्ष्यताम् –

मुखे स्मितश्रीर्वचने श्रुतेर्गीः
कण्ठे युवत्या मधुरस्वरर्धिः ।
लेखे च शृङ्गाररसस्य सिद्धि-
र्विधाय पादान् ननृतुर्नु तस्य ।।

श्लिष्टोपमाविधाने कवेः कौशलं क्षणं निभाल्यताम् –

तरोरधस्तादथ नातिदूरं
जीर्यद्दले पातितदीर्घकायः ।
शार्दूलविक्रीडितशीलकोऽपि
शारङ्गवद् वाणहतोऽश्वसीत् सः।।

इत्थमेव कवेर्वर्णनकौशलं कीदृशं विद्यते सहृदयानां मनोरञ्जनाय मोतिरामभट्ट-वर्णनविषयको दृष्टान्तोऽधः प्रस्तूयते –

भाले त्रिपुण्ड्रं स गलेऽक्षमालां
नैपालिकीं पाण्डुलिपिञ्च पाणौ ।
पादूद्वयं पादयुगे च गृह्णन्
मनस्विनीनामपि हृज्जहार ।।

प्रतीयमानस्यार्थस्य चमत्कारः स्थाने स्थाने समुपलभ्यते । प्रसादगुणस्य किं वा माधुर्यगुणस्य छटा यत्र तत्र दृष्टिपथमभतरति । रसानां विन्यासोऽपूर्वामेव विच्छित्ति-मादधाति । वक्रोक्तेः सौन्दर्यं यदा कदा पाठकानां पुरो दृक्पथं अवतरति । छन्दोविधाने भरतराजस्य कौशलं नितान्तमेव सहजं विलोक्यते । भावानुसारेण छन्दसामलङ्काराणां च प्रयोगे कविरयं नितान्तमेव कुशलो विभाव्यते । तस्य भाषा परिस्कृता परिमार्जिता च लभ्यते ।

अहर्निशं नेपालीभाषायां संस्कृतभाषायाञ्च काव्यप्रणयने संलग्नस्य कवेर्भरत-राजस्य बहूनि ग्रन्थरत्नानि प्रकाशितानि सन्ति । एतादृशं महनीयं कार्यं कुर्वते कवये भरतराजाय हार्दम् धन्यवादं प्रयच्छाम्यहम् ।

माधवराजगौतमः
उपकुलपतिः

हरिबोधिनी, एकादशी, २०५७

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रकाशकीयम्

महेन्द्रसंस्कृतविश्वविद्यालयस्य प्रकाशनमालायाः पञ्चपञ्चाशपुष्पतया **मोतिवृत्तम्** नाम काव्यं प्रकाश्यत इति सामोदमावेदयामि पाठकानां पुरतः।

विविधकाव्यकलाकलनकुशलेन भरतराजमन्थलीयमहाभागेन प्रणीतमिदं काव्यं मोतिरामभट्टविषयमवलम्ब्य प्रणीतं सुन्दरं रत्नं विद्यते। विविधैरलङ्कारैर्मण्डितेयं कृतिर्विषयवस्तुविन्यासकलाविधानादिभिर्वैशिष्ट्यमवगाहते। कविरसौ, उपमाविधाने कालिदासकाव्यकलामनुसरति । छेकानुप्रासवृत्त्यानुप्रासादीनां शब्दालङ्काराणां प्रयोगेऽपि कवेरस्य वैशिष्ट्यं कृतेरवलोकनेन विदितं जायते। संस्कृतभाषायां लिखितं काव्यमिदं नैपालकसंस्कृतकाव्यपरम्परायां नवीनतमं रत्नं विद्यत इति विभावये।

प्रसङ्गेऽस्मिन् निरन्तरं सद्ग्रन्थप्रणयनसम्पादनप्रकाशनादिकार्येषु प्रेरणां प्रोत्साहनञ्च प्रदाय मार्गदर्शनं कुर्वद्भ्यो महेन्द्रसंस्कृतविश्वविद्यालयस्य उपकुलपति-पदमलङ्कुर्वद्भ्यः श्रीमाधवराजगौतममहाभागेभ्यो हृदयतः कृतज्ञतां समर्पयामि। अस्य काव्यस्य महताध्यवसायेन प्रणयनं विधाय प्रकाशनाय प्रस्तुतवते कवये श्रीभरतराजमन्थलीयमहोदयाय धन्यवादं प्रयच्छामि।

पुनश्च सुन्दरकम्प्यूटरटङ्कणकारिणे बागबजारस्थ-क्वालिटीलेजरप्रिन्ट-संस्थानाय, सुरुचिरमुद्रणविधायिने डिल्लीबजारस्य नेपालप्रिन्टर्सएण्डको-अपरेटिभलिमिटेडाख्य-संस्थानाय च धन्यवादं प्रदायान्येभ्यश्च संबद्धसहयोगिभ्यः धन्यवादं वितराम्यहम्।

हरिबोधिन्येकादशी, २०५७

प्रा.डा. वावुरामपोख्रेलः
शिक्षाध्यक्षः
महेन्द्रसंस्कृतविश्वविद्यालयः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आत्मव्याहृतिः

ईशयुगाभ्रनेत्र(२०४१)मिते वैक्रमाब्दे जायमानयाऽप्यनया ममौरस्यया कृतिकिशोरिकया काव्यकृतिलावण्यमलब्ध्वाऽभिमतं लोकचक्षुर्वरसंयोजनं नाऽवाप्यद्यपर्यन्तम् । सम्प्रति संस्कृतव्याख्यानेपालीटीकावयस्कयोः साहचर्येण द्योतितभावोदया षोडशीयं कतिपयैः पुनः परिमार्जितैर्धृतशब्दपुष्पैः पुष्पवतीव प्रतिभाति । अस्या नेपालीशिक्षापरिषत्कोशतः प्रकाशनरूपं पाणिग्रहसंस्कारं सम्पादयितुं सप्रश्रयं विनिवेदितास्तत्परिषदि साचिव्यपदमलङ्कुर्वाणाः श्रीयुता रमाशर्माभिधा विदुष्यः । एताः परिषत्कोशस्याऽर्थाभावेनाऽक्षमत्वेऽपि महेन्द्र-संस्कृतविश्वविद्यालयस्योपकुलपतीनुपेत्य तदेव निवेदयामासुः। एतेऽपि संस्कृत-साहित्यप्रवर्धनपरायणाराष्ट्रियविभूतेर्मोतिरामस्य जीवनवृत्ते कलितां काव्यकृतिं संस्कृते निभाल्याऽङ्गीकृतवन्तस्तदनुरोधम् । धन्या एता विदुष्यो धन्या एते मनीषिणश्च । अत एतेभ्यो हृदयतः कृतज्ञतामर्पयामि ।

धन्यवादाः सन्तु तेष्वपि विराटनगरकञ्चनवारिवास्तव्येषु व्याकरण-साहित्यपुराणशास्त्रिषु विद्वद्वरेषु नरहरिनेपालाख्येषु यैरिमां कृतिं निरीक्ष्य वैयाकरणदृष्ट्या स्थाने स्थाने परिमार्जनाय प्रत्तपरामर्शोऽहमभवम्। इति शम्।

अवनतो लेखकः

२०५७, हरिबोधनी एकादशी ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मौतिवृत्तम्

पूर्वार्द्धम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मोतिवृत्तम्

पूर्वार्द्धम्

अर्थेषु लुब्धाः कवयो विदग्धाः
स्तुवन्ति दुर्वृत्तमपीव मुग्धाः ।
अभूरिवित्तस्य गुणोत्तमस्य
श्लाघाऽस्ति लोके विरला जनस्य ।।१।।

धनका लोभी धूर्त्त पण्डितहरू मायालुजस्ता भएर, अथवा व्यङ्ग्यप्रेमी कविहरू, दुर्गुणै थाहा नपाएका लाटाजस्ता भएर, दुर्जनको पनि प्रशंसा गर्छन् । धन धेरै नहुने, तर गुण धेरै हुने, उत्तम पुरुषको प्रशंसा भने संसारमा कमै छ ।

वीणापाणि महावाणि चरणौ प्रणमामि ते ।
टीकाऽस्तु रमणी काव्ये 'पदार्थान्वयबोधिनी' ।।

अर्थेष्विति । अर्थेषु धनेषु प्रयोजनेषु वा । 'हिरण्यं द्रविडं द्युम्नमर्थरैविभवा अपि' इति, 'अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु इति चामरः । लुब्धा लोभान्विताः प्रयोजनपूरणेच्छुका वा । अर्थश्च त्रिधा मतो यथा साहित्य दर्पणे- 'अर्थो वाच्यश्च लक्ष्यश्च व्यङ्ग्यश्चेति त्रिधा मतः।' अतो व्यङ्ग्यार्थ विधानोत्सुका वेत्यर्थः । विदग्धा व्युपसर्गपूर्वकाद् दह भस्मीकरणे धातोःक्तः। 'उपसर्गेण धात्वर्थो बलादन्यत्र नीयते ।' अतो धूर्त्ता वा चतुराः । कवयः पण्डिता वा काव्यकाराः। 'धीरो मनीषी ज्ञः प्राज्ञः संख्यावान् पण्डितः कविः' इत्यमरः। दुर्वृत्तं दुष्टानि वृत्तानि चरित्राणि यस्य तं तथोक्तम् । अप्यव्ययमर्थ–

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्योतनाय । मुग्धाः प्रणयमोहोन्मत्ता वा मूढा हतबुद्धित्वात् । 'मुग्धः सुन्दरमूढयोः' इत्यमरः । इव यथा स्तुवन्ति प्रशंसन्ति । धनलुब्धा धूर्त्ताः पण्डिता दुश्चरित्रं पुरुषमपि धनप्राप्त्याशया तत्प्रणयोन्मत्ता इव प्रशंसन्ति वा चतुराः काव्यकाराः खलमपि जनं हेतुज्ञानायनिगूढ व्यङ्ग्यार्थेनाऽज्ञाततद्दुर्गुणा मूढा इव प्रशंसन्तीतिभावः । एतेन गूढार्थेन न सत्कवेर्निन्दा । लोके जगति । अभूरिवित्तस्य न विद्यते भूरि प्रचुरं वित्तं धनं यस्य तस्याऽल्पधनस्येत्यर्थः । धनदानाक्षमस्येति यावत् । 'अभूरिवित्तस्य' इत्यत्र नञोऽयमकारः । 'अशब्दः स्यादभावेऽपि स्वल्पार्थप्रतिषेधयोः' इतिमेदिनी, 'पुरुहूः पुरु भूयिष्ठं स्फारं भूयश्च भूरि च' इत्यमरः । गुणोत्तमस्य गुणैरुत्कृष्टकर्मभिरुत्तमस्य श्रेष्ठस्य जनस्य व्यक्ति-विशेषस्य। श्लाघा प्रशंसा विरलाऽल्पाऽस्ति । 'गुणिनः सन्ति विरला विरलतरा गुणवेत्तारः ।' इति 'अस्यादभावे स्वल्पार्थे विष्णावेषत्वनव्ययम्' ति हैमवचनाद-शब्दस्य ग्रन्थारम्भ एवं प्रयोगान्मङ्गलाचरणत्वम्। अत्रोत्तरार्धस्य सामान्येनार्थेन पूर्वार्धस्थ विशेषार्थसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारो लक्षणं यथा साहित्य-दर्पणे– 'सामान्यं वा विशेषेण विशेषस्तेन वा यदि। कार्यञ्च कारणेनेदं कार्येण च समर्थ्यते । साधर्म्येणेतरेणार्थान्तरन्यासः। इति । पूर्वार्ध उपमान्त्यानुप्रासौ च । एतैः संसृष्टिरलङ्कारः । संसृष्टेर्लक्षणं यथा तत्रैव– 'मिथोऽनपेक्षयैतेषां स्थितिः संसृष्टिरुच्यते' इति । इन्द्रवज्रोपेन्द्रवज्रयोर्योगादुपजातिवृत्तं लक्षणं यथा द्वयोर्वृत्तरत्नाकारे 'स्यादिन्द्रवज्रा यदि तौ जगौ गः' इति, 'उपेन्द्रवज्रा प्रथमं लघौ सा' इति च ॥१॥

नेत्रेण मुक्तानपि नेत्र युक्ता-
नतद्विहीनानपि तद्विहीनान् ।
अर्थः करोत्यत्र जगत्यनर्थं
न दोषभाजः कवयस्तदर्थम् ॥२॥

यस संसारमा अर्थ (धन) ले आँखा नभएकालाई आँखा भएका र आँखा भएकालाई आँखा नभएका बनाएर अनर्थ गर्छ । तसर्थ कविहरूलाई धनका

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लोभी भए भनेर दोष दिनु हुँदैन ।

नेत्रेणेति । अत्र जगत्यस्मिन् लोके मर्त्यलोक इत्यर्थः । अर्थोधनं कर्तृपदमेतत् । नेत्रेणाऽक्ष्णा मुक्तान् त्यक्तानक्ष्णा काणानित्यर्थः । नेत्र युक्तान् नेत्रेण युक्तान् सहितान् चक्षुष्मत इत्यर्थ औषधधोपसेवनेन वा शल्यचिकित्सया वा वैज्ञानिकयन्त्रप्रयोगेणेत्याशयः । करोति विद्धाति । अर्थेन जना नेत्राहित्येऽपि चक्षुष्मन्त इव दर्शनक्षमा भवन्तीति भावः । अतद्विहीनान् तेन नेत्रेण विहीना विशेषेण शून्यास्तद्विहीना न तद्विहीना अतद्विहीनास्तान् नेत्रसहितानित्यर्थः । तद्विहीनान् नेत्ररहितान् । अनर्थमनुपयुक्तं यथा तथा करोतीति क्रियाया विशेषणं चैतत् । करोति विदधाति । अर्थोबुद्धिशोषणेन वा पारतन्त्र्यनिविडजालनिक्षेपणेन चक्षुष्मतोऽप्यचक्षुषः करोतीति वाऽस्मिन् वैज्ञानिके युगेऽचक्षुर्जनोऽपि धनेन चक्षुष्मतश्चक्षुः क्रीत्वा तच्च चिकित्सकेन स्वचक्षुःस्थाने स्थापयित्वा चक्षुष्मान् भवतीत्याशयः। तदर्थं तद्धेतोः। कवयः पण्डिताः। दोषभाजो दोषं त्रुटिं भजन्तीति दोषभाजः । न भवन्ति । अर्थोऽनर्थं करोतीति विरोधः समाधानं त्वनर्थमनुपयुक्तं यथा तथा करोतीति । अतोऽत्र विरोधाभासोऽलङ्कारस्तल्लक्षणं यथा साहित्य-दर्पणे-

'जातिश्चतुर्भिर्जात्याद्यैर्गुणो गुणादिभिस्त्रिभिः ।
क्रिया क्रियाद्रव्याभ्यां यद्द्रव्यं द्रव्येण वा मिथः ।
विरुद्धमेव भासेत विरोधोऽसौ दशाकृतिः' इति ।।२।।

कवीनमात्या धनमानमत्ताः
श्लोकैर्यदा श्लोकयितुं स्वसत्ताः ।
उत्प्रेरयन्ति स्म तदा विपश्चित्
क्षेत्रे कवीनामुदियाय कश्चित् ।।३।।

धन र मानले मातेका मन्त्रीहरू आफ्ना मान प्रतिष्ठाको वयान श्लोकबाट गराउन जुन बखतमा कविहरूलाई बाध्य गराउँथे, त्यही बखतमा कविक्षेत्रमा मिथ्यास्तुतिको घेरा छिचोलेर कुनै विद्वान् निस्के ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कवीनिति । धनमानमत्ता धनं वित्तं मानः प्रतिष्ठाऽभिमानो वा ताभ्यां मत्ता गर्वितास्तथोक्ता मदान्धाइत्यर्थः । 'गर्वोऽभिमानोऽहङ्कारो मानश्चित्तसमुन्नतिः।' इत्यमरः । अमात्या मन्त्रिणो यदा यस्मिन् काले स्वसत्ता आत्मास्थाः स्वमानान्, स्वयशांसीत्यर्थः । श्लोकैः पद्यैः श्लोकयितुं प्रशंसयितुम् । श्लोकैः श्लोकयितु-मित्यत्रार्थवैभिन्यान्नपुनरुक्तिदोषो यथाहाऽमरसिंहः- 'पद्ये यशसि च श्लोकः' इति। कवीन् काव्यकारान् । उत्प्रेरयन्ति स्म प्रबलप्रेरणां कुर्वन्ति स्म । 'अपरोक्षे च' इतिं लट् । तदा तस्मिन् काले । यदा तदेत्यत्र 'सर्वैकान्यकिंयत्तदः काले दा' इति दा । कवीनां क्षेत्रेस्थाने कविजगत्यामित्यर्थः । कश्चित्कश्चन । विपश्चिद् विद्वान् । उदियायोत्थितो बभूव । उत्पूर्वकादिण् धातोर्लिट् । दुष्टमन्त्रिणां मिथ्यागुणव्याख्याने व्यवधानस्वरूपः कश्चिद् विद्वान् कविरुत्थित इत्यर्थः । अत्र पादान्तेषु समस्वरव्यञ्जनप्रयोगादन्त्यानुप्रासोलङ्कारः । लक्षणं यथा-साहित्यदर्पणे - व्यञ्जनं चेद् यथावस्थं साहाय्येन स्वरेण तु । आवर्त्यतेऽन्य-योज्यत्वादन्त्यानुप्रास एव तत् ।।३।।

विभावयन् भानुमिवादि भानुं
चाऽऽलोकयन् लोकमलोचनाभम् ।
योऽयोजयत् तत्कवितामयूखान्
स 'मोतिरामः' स्मृतिमेति मुख्याम् ।।४।।

श्रीभानुभक्त आचार्यलाई बालसूर्य (आदि भानु) झैं सम्झेर, यता दुनियाँलाई आँखामा ज्योति नभएको देखेर, जसले उनको कवितारूपी किरण जुटाए अर्थात् जसले काव्यको उज्यालो थाहा नपाएका दुनियाँलाई आदिकवि भानुभक्तका कविताको उज्यालो दिए, तिनै मोतीरामलाई धेरै सम्झिइन्छ ।

विभावयन्निति । भानुं भानुभक्ताचार्यम् । 'नामैकदेशे नामग्रहणम्' इत्युक्तेः । आदिभानुमादिश्चासौ भानुरादि भानुस्तं तथोक्तम् । 'दा भाभ्याम्' इति नुः । प्रथमसूर्यं बालसूर्यमित्यर्थः । इव यथा विभावयन् विचारयन् । लोकं जनं चाऽलोचनाभं लोचनयोर्नयनयोराभा ज्योतिर्लोचनाभा न विद्यते

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लोचनाभा यस्मिंस्तं चक्षुर्ज्योतिः शून्यमित्यर्थोऽन्धमिति यावत् । आलोकयन् विलोकयन् । यो विपश्चित् । तत्कवितामयूखान् तस्य भानुभक्तस्य कविताः पद्यान्येव मयूखाः किरणा स्तान् यद्वा कविता मयूखा इव 'उपमितं व्याघ्रादिभिः, सामान्याप्रयोगे' इत्युपमितसमासेऽथवा कवितानां मयूखा स्तांस्तथोक्तान् । अयोजयत् समगमयत् काव्यच्छविं प्रापयदित्यर्थः । स पूर्वाभिहितः । 'मोतिरामः' मोतीरामाभिधानो विद्वान् । मोतीरामेतिनाम्नि 'ती'त्यस्य 'इकोह्रस्वोऽङ्यो गालवस्य' इति विकल्पेन ह्रस्वः । संस्कृते ह्रस्वादेव माधुर्यम् । मुख्यां प्रमुखां स्मृतिं स्मरणमेत्यागच्छति। प्राधान्येन स्मर्यत इति भावः। अत्र वकार-भकारलकारयकारतकारादिवर्णानामसकृत्प्रयोगाद् वृत्यनुप्रासोऽलङ्कारः । रसविषयव्यापारवती वर्णरचनावृत्तिः, तदनुगतत्वेन प्रकर्षेणन्यसनाद् वृत्यनुप्रास इति साहित्यदर्पणकारः । लक्षणं यथा– 'अनेकस्यैकधा साम्यमसकृद्वाप्यनेकधा' एकस्य सकृदप्येष वृत्यनुप्रास उच्यते ।।' इति । कवितामयूखानित्यत्रोपमा वा रूपकालङ्कारः । भानुमिवादि भानुमित्यत्र चोपमा । ततः संसृष्टिः ।।४।।

य: केवलं सङ्कलनं कृतीनां
चक्रे न वा संघटनं कवीनाम् ।
स्वहास्यशृङ्गाररसाप्तसेकं
शान्तेन चाऽऽप्याययदात्मलोकम् ।।५।।

जसले कृतिहरूको मात्र संग्रह गरेनन् अथवा ती कृतिकारक कविहरूको मात्र संगठन गरेनन्, हास्यशृङ्गार रससँग परिचित आफ्ना काव्यका पाठकहरूलाई शान्तरसले पनि तृप्त पारे, तिनै मोतीरामलाई धेरै सम्झिइन्छ ।

य इति । यः पूर्वोद्दिष्टो विद्वान् मोतिराम इत्यर्थः । कृतीतां रचनानां सङ्कलनं संग्रहं वा कवीनां काव्यकाराणां संघटनमेकत्रीकरणं केवलं यथा तथा न चक्रे न चकार । स्वहास्यशृङ्गाररसाप्तसेकं हास्यञ्च हास्यरसश्च शृङ्गारश्च सम्भोगविप्रलम्भात्मक शृङ्गाररसश्च हास्यशृङ्गाररसौ स्वस्यात्मनो मोतिरामस्येत्यर्थो यौ हास्यशृङ्गाररसौ ताभ्यामाप्तो लब्धः सेकः सेचनं येन

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तम् । आत्मलोकं स्वदेशवासिन इत्यर्थः स्वकाव्यपाठकवर्गमिति यावत् । शान्तेन च शान्तरसेनाऽपि । आप्याययत् तृप्तमकारयत् । शान्तेनाऽऽत्म लोकमाप्याययदिति प्रयोगेण परब्रह्मपरायणजनानाप्याययदित्यपि व्यज्यते । 'स मोतिरामः स्मृतिमेति मुख्याम्' इत्यत्र पुनः सम्बन्धः ।।५।।

देशेऽस्मदीये श्रितपश्चिमाशः
सुग्राम आस्ते किल 'रागिनाशः' ।
गण्यः स गण्डे गुरुगण्डकस्य
बभूव वेदध्वनितः प्रशस्यः ।।६।।

हाम्रो देशको पश्चिम भागमा **रागिनाश** नाम गरेको राम्रो एउटा गाउँ छ । विशाल गण्डकी अञ्चलको बीचमा औंल्याइएको त्यो गाउँ कुनै बेला वेदध्वनिले प्रशंसनीय थियो ।

देश इति । अस्मदीय आस्माकीने । 'युष्मदस्मदोरन्यतरस्यां खञ्च' इति छप्रत्ययः । देशे राष्ट्रे नेपालदेश इत्यर्थः । श्रित पश्चिमाशः श्रिता वृता । पश्चिमाऽऽशाप्रतीची दिक् येन स तथोक्तः पश्चिमदिक्स्थ इत्यर्थः । 'दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः' इत्यमरः । रागिनाश स्तदाख्यः सुग्रामः सुष्ठुश्चासौ ग्रामः संवसथः सुग्रामः । 'समौ संवसथ ग्रामौ' इत्यमरः । आस्तेऽस्ति। आस उपवेशने धातोरात्मनेपदि लट् । गुरुगण्डकस्य गुरुर्विशालश्चासौ गण्डको गण्डकाख्योञ्चलस्तस्यगण्डे मध्यभागे, गण्डो मुखमण्डलस्य मध्यभाग एव वर्ततेऽतएव मध्यार्थे प्रयोगः । विशालं ग्रामं गण्डग्राम इति कथयन्ति, ग्रामस्य विशालताद्योतनायाऽपि गण्डशब्दस्याऽत्र प्रयोगः गण्यो, गणनीयः सुख्यात इत्यर्थः । स ग्रामः । वेदध्वनितो वेदानामृग्यजुःसामाथर्ववेदानां ध्वनिः स्वरो वेदाध्ययनाध्यापनादिस्वर इत्यर्थस्ततः । 'पञ्चम्यास्तसिल्' इति तसिल्प्रत्ययः। प्रशस्यः प्रशंसार्हः । बभूव अभूत् । अत्राऽन्त्यानुप्रासवृत्यनुप्रासालङ्कारौ संसृष्टिश्च ।।६।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मोतिवृत्तम्

स्रवत्सरिच्छैलवनैर्वरिष्ठः
शस्यप्रसूनैरनिशं गरिष्ठः ।
आसीत् स विद्याधर वासभूमि -
र्यत्राऽध्यवात्सीद् द्विजभट्टयोनिः ।।७।।

ठाडै झरेका नदी, पहाड र वनले सर्वश्रेष्ठ तथा अन्न र पुष्पले सबभन्दा महत्त्वपूर्ण त्यो गाउँ विद्याधर (देवयोनि विशेष) हरूको अथवा विद्यावान् (विद्वान्) हरूको निवासस्थान थियो, जसमा भट्ट ब्राह्मणहरूको मूल वंश बस्थ्यो ।

स्रवदिति । स्रवत्सरिच्छैलवनैः स्रवन्त्य उन्नतभूमे रापतन्त्यो या सरितो नद्य स्ताश्च शैलाः पर्वताश्च वनानि काननानि च तै स्तथोक्तैः । 'नदी सरित् । तरङ्गिनी शैवलिनी तटिनी ह्रादिनी धुनी' इति, । 'अटव्यरण्यं विपिनं गहनं काननं वनम्' इति चामरः । वरिष्ठः श्रेष्ठः सर्वेषां ग्रामाणाम् । शस्यप्रसूनैः शस्यानि धान्यानि च प्रसूनानि पुष्पाणि च तैस्तथोक्तैः । 'शस्यं क्षेत्रगतं प्रोक्तं सतुषं धान्यमुच्यते। निष्तुषस्तण्डुलः प्रोक्तः स्विन्नमन्नमुदाहृतम्' इति शास्त्रकाराः। अनिशमनारतम् । 'सततानारताश्रान्तसन्तताविरतानिशम्' इत्यमरः । गरिष्ठः सर्वेषां ग्रामाणां महत्त्वपूर्णः । स ग्रामः । विद्याधरवासभूमिर्विद्याधराणां देवयोनिविशेषाणां, सिद्धानामित्यर्थः 'विद्याधराप्सरो यक्षरक्षेगन्धर्वकिन्नराः । पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनयः' इत्यमरः । वा धरन्तीति धराः पचाद्यच्, विद्यानां चतुर्दश विद्यानां धरा विद्याधरा विद्वांसस्तेषां वासभूमिर्निवास-स्थानम् । विद्याधरशब्दसामर्थ्येन कुवेरस्याऽलकाया भोजराजस्य धारानगर्य्याश्च साम्यम्। आसीदभवत् । यत्र यस्मिन् ग्रामे 'सप्तम्यास्त्रल्' इति त्रल् । द्विजभट्ट योनिर्द्विजेषु विप्रेषु ये भट्टा भट्टोपाख्या जना स्तेषां योनिर्मूलं कुलमित्यर्थः। योनिशब्दस्य मूलार्थे प्रयोगो यथा भवभूते रुत्तररामचरिते– 'सा योनिः सर्ववैराणां सा हि लोकस्य निर्ऋतिः' इति न ग्राम्यदोषः कविसम्प्रदाये प्रचलितत्वात् । अध्यवात्सीदधिवसतिस्म । अत्राङ्गिरूपे स्वभावोक्त्यलङ्कारे विद्याधरशब्दस्य श्लेषालङ्कारस्याङ्गत्वेन स्थितेः सङ्करालङ्कारः । स्वभावोक्तेर्लक्षणं यथा

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

साहित्यदर्पणे- स्वभावोक्तिदुरूहार्थ स्वक्रियारूपवर्णनम्' इति। श्लेषस्य यथा- 'श्लिष्टैः पदैरनेकार्थाभिधाने श्लेष इष्यते । वर्णप्रत्ययलिङ्गानां प्रकृत्योः पदयोरपि' इति । सङ्करस्य च यथा - अङ्गाङ्गित्वेऽलङ्कृतीनां तद्वदेकाश्रयस्थितौ । सन्दिग्धे च भवति सङ्करस्त्रिविधः पुनः ।।' इति ।।७।।

तस्यैकशाखा समयेऽनुकूले
प्रोवास किं शङ्करगाङ्गकूले ।
सुरार्चनाध्यापनविप्रवृत्या
चिक्षाय कालं किल चक्ररीत्या ।।८।।

त्यो भट्ट वंशको एक शाखा अनुकूल समयमा, शिवजीको गङ्गातट काशीमा गई बसेको र त्यसले द्यौ-द्यौताको पूजाआजा, अध्यापन आदि ब्राह्मणवृत्ति लिएर पाङ्ग्राजस्तै घुमिरहने सुखदुःख भेल्दै समय यापन गरेको अनुमान छ ।

तस्येति । तस्य भट्टवंशस्य एकशाखैकभागः । अनुकूलेऽभिमते । समये काले । शङ्करगाङ्गकूले गङ्गायां भवं गाङ्गं 'तत्र भवः' इत्यण् । अपत्यार्थाभावात् 'शिवादिभ्योऽण्' इति नाऽण् । गाङ्गं च तत्कूलं गाङ्गकूलं भागीरथीतटं शङ्करस्य शिवस्य विश्वनाथस्येत्यर्थः । यद् गाङ्गकूलं तस्मिन् काश्यामित्यर्थः। प्रोवास प्रोपसर्गपूर्वकाद् वस धातोर्लिट् । प्रवासं चक्रे । किमिति तर्के । सा शाखा सेत्यध्याहार्यः । सुरार्चनाध्यापनविप्रवृत्या सुरार्चनं देवपूजनं चाऽध्यापनं च पाठनं च सुरार्चनाध्यापने ते एव या विप्रवृत्तिर्ब्राह्मण व्यापारस्तया तथोक्तया। 'अध्यापनमध्ययनं यजनं याजनं तथा । दानं प्रतिग्रहश्चैव षट्कर्माण्यग्रजन्मनः।।' इति मनुः । कालं समयं चक्ररीत्या रथाङ्गभ्रमणप्रकारानुसारेण । सुखादनन्तरं दुःखं दुःखादनन्तरं सुखमनुभूयेत्यर्थः । चिक्षाय व्यतीयाय । क्षि क्षये धातोः परस्मैपदि लिट् । किलेति निश्चितार्थे । कालशब्देन सह चक्रशब्दस्य प्रयोगो- यथाऽध्यात्मरामायणे- (बाल. ६-७५) 'यत्पादपङ्कज-परागसुरागयोगिवृन्दैर्जितं भवभयं जितकालचक्रैः ।' इति ।।८।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

केनाऽपि कार्येण सकौशलेन
प्रीतः प्रवासी रणवाहदूरः ।
तद्भट्टवंशोद्भव 'दत्तरामं' -
स्वराजधानीं स्वयमानिनाय ।।९।।

कुनै दक्षतापूर्ण कामले खुसी भएका प्रवासी राजा 'रणबहादुर' ले त्यो भट्ट ब्राह्मणको वंशमा जन्मेका 'दत्तराम' लाई आफ्नो राजधानी काठमाडौंमा आफूसँगै ल्याए ।

केनापीति । केनाऽपि केनचित् । सकौशलेन कौशलेन कौशल्येन दाक्ष्येणेत्यर्थः, सहितं सकौशलं तेन तथोक्तेन । 'हायनान्तयुवादिभ्योऽण्' इत्यण् । 'कुशल-चपल-निपुण-पिशुनकुतूहल-क्षेत्रज्ञा युवादिषु पठ्यन्ते' इति तत्रैव द्रष्टव्यम् । कार्येण कर्मणा सेवाकर्मणेत्यर्थः । प्रीतः प्रसन्नः । प्रवासी प्रवासो यस्याऽस्तीति प्रवासी परदेशनिवासी । रणवाहदूर स्तदाख्यः साहवंशीयनृपतिः । भाषायां 'रणबहादुर' इत्यभिधेयः । तद्भट्टवंशोद्भवदत्तरामं स एव भट्टवंशस्तद्भट्टवंशो भट्टब्राह्मणकुलं रागिनाशग्रामात्काशींगत इति तर्कितो भट्टवंश इतिभावः । तस्मिन्नुद्भवो जन्म यस्य स तद्भट्टवंशोद्भवः स चासौदत्त राम स्तन्नामधेयो ब्राह्मणस्तम् । स्वराजधानीं स्वस्याऽऽत्मनो राजधानी तां प्रधाननगरीं कान्तिपुरमित्यर्थः । धीयन्तेऽस्यामिति धानी 'करणाधिकरणयोश्च' इति ल्युट्, राज्ञां धानी राजधानी 'दुह्याच्पच्दण्डरुधिप्रच्छिचिब्रूशासुजिमथ्मुषाम्' इति द्वितीया च ।' प्रधाननगरी राज्ञां राजधानीति कथ्यते' इति शब्दार्णवः । स्वमात्मनैव । आनिनायाऽऽनीतवान् ।।९।।

स्वमासनं प्राप्य पुनर्महीप-
स्तस्मै ददौ गा बहुला महीश्च ।
तत्सन्ततिस्ताद्धनतस्ततान
श्रियं जलेनेव लताप्रतानः ।।१०।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

काशीबाट कान्तिपुरमा आई फेरि राजसिंहासनमा विराजमान भएपछि, राजा रणबहादुरले दत्तरामलाई धेरै गाई र जमिन पनि दिए । लहराका अङ्कुरले जल पाएर शोभा बढाएझैं, उनका सन्तानले त्यस पूँजीबाट ऐश्वर्य जमाए ।

स्वमिति । महीपः पृथ्वीपती रणबहादुर इत्यर्थः । पुनर्भूयः । स्व मात्मीयम् । 'स्वो ज्ञाता वात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धने' इत्यमरः। स्वशब्दस्य सर्वनामसंज्ञायां सर्ववद्रूपं, ज्ञातिधनार्थयोस्तु रामशब्दवत् । आसनं राजासनं प्राप्य लब्ध्वा, काशीप्रवासादागत्य पुनः सिंहासनमधिरुह्येत्यर्थः । तस्मै दत्तरामाय 'चतुर्थीसम्प्रदाने' इति चतुर्थी । बह्वी गार्धेनूर्महीश्च पृथ्वी-खण्डान्यपि क्षेत्रादीनीत्यर्थः । ददौ दत्तवान् । लताप्रतानो लताया वल्लर्याः प्रतानोऽङ्कुरः । प्रोपसर्गपूर्वकात्तनधातोर्घञ् प्रत्ययः । जलेन पयसा श्रियं शोभामिव वृद्धेर्हेतोः । तत्सन्ततिर्दत्तरामकुलं तद्धनतो गोपृथ्वीरूपधनतः । अपादाने पञ्चम्यन्तात्तसिः प्रत्ययः । श्रियमैश्वर्यम् । 'सम्पत्तिः श्रीश्चलक्ष्मीश्च' इत्यमरः । ततान विस्तारयामास । तनुविस्तारे धातोर्लिट् । अस्मिन् पद्य उत्तरार्धे तकारस्य बहुवारप्रयोगेण वृत्त्यनुप्रासः 'ततान प्रतानः' इत्यनेनाऽन्त्या-नुप्रासः । श्रियमित्यत्र श्लेषः । एतेऽङ्गरूपा, अङ्गी तु धनजलयोः सन्तति-लताप्रतानयोश्च गुणसाम्येनोपमालङ्कारः । अलङ्काराणामङ्गाङ्गित्वेन सङ्करो-ऽलङ्कारः ॥१०॥

त्रिलोचनाङ्केश्वर विक्रमाब्दे
कुहूरभूच्चन्द्रमसा नभस्ये ।
अवाप रात्रौ द्विजराजमेकं
बालं यतः सा समयूखजालम् ॥११॥

विक्रम संवत् १९२३ भदौ महिनामा पर्ने कुशे औंसीको रातमा झलमल्ल जून लाग्यो, किनभने त्यो औंसीले किरणको पुञ्ज लिएको नवोदित द्विजराज (चन्द्रमा अथवा एक उत्तम ब्राह्मण-बालक) लाई पाएको थियो ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्रिलोचनेति । त्रिलोचनाङ्केश्वरविक्रमाब्दे त्रिश्चत्रिसंख्या च लोचने च द्विसंख्या चाङ्काश्च नवसंख्या चेश्वरश्चैक संख्याचेति त्रिलोचनाङ्केश्वरास्तैर्गणितो विपर्यासरीत्यागणित इत्यर्थः, यो विक्रमाब्दस्तदाख्यः सम्बत्सरो 'विक्रमादित्याख्येन राज्ञा चालितत्वात्तदाख्य इति ज्ञेयस्तस्मिन् तथोक्ते । १९२३ इत्यङ्कमित विक्रमाब्द इति यावत् । 'सम्वत्सरो वत्सरोऽब्दः' इत्यमरः । कुहू रमावास्या कुशग्रहण्यमावास्येत्यर्थः । 'अमावास्यात्वमावस्या दर्शः सूर्येन्दुसङ्गमः सा दृष्टेन्दुः सिनीवाली सा नष्टेन्दु कुहूः ।।' इत्यमरः । चन्द्रमसा। चान्द्रमसी चन्द्रयुक्तेत्यर्थः । अभूदासीत् । कथमभूदित्याह - यतो यत् । 'यत्तद्यतस्ततो हेतौ' इत्यमरः । सा नष्टेन्दुकलाऽमावास्या । रात्रौ निशि । समयूरवजालं मयूखानां किरणानां यज्जालं समूहस्तेन सहितस्तं तथोक्तम् । 'सहस्य सः संज्ञायाम्' इति सः । एकं कश्चित् । बालं नवोदयं समूखजालं द्विजराजं चन्द्रम् । 'द्विजराजः शशधरो नक्षत्रेशः क्षपाकर' इत्यमरः । पक्षे- 'एकमेकसंख्यकं समयूखजालं ज्योतिष्मन्तं बालमर्भकं द्विजराजं ब्राह्मणवरम्। 'दन्तविप्राण्डजा द्विजाः । इत्यमरः । अवाप प्राप । अत्र बालो द्विजराजः कुह्वाश्चन्द्रत्व हेतुना वर्तमानत्वात् काव्यलिङ्गालङ्कारः । द्विजराजशब्देश्लेषश्च। काव्यलिङ्गस्य लक्षणं यथा साहित्यदर्पणे- 'हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते' इति ।।११।।

नामार्थभिन्ना सुषुवे सुबालं
हृयजातशत्रू 'रिपुमर्दिनी' तम् ।
यं 'भोसिको' कान्तिपुरस्य पल्ली
दधौ सुमं भानुमुखीव वल्ली ।।१२।।

शत्रु नै नहुँदा नामको अर्थ न मिलेकी रिपुमर्दिनी (शत्रु दमन गर्ने) ले ती सुन्दर बालक पैदा गरिन् । जसलाई बोटले भानुमुखी (सूर्यमुखी) फूल जस्तै, कान्तिपुरको -भोसिको' टोलले धारण गर्‍यो ।

नामेति । अजातशत्रूरिपुरहिता । अतएव नामार्थभिन्नानाम्नः स्वाभिधान-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्याऽर्थेन तात्पर्येण भिन्ना पृथक्, अयथार्थनाम्नीत्यर्थः । रिपुमर्दिनी तन्नाम्नी ब्राह्मणी । यस्यार्थो भवतिरिपूणां शत्रूणां मर्दिनी मर्दनकारिणी । तं पूर्वोक्तं सबालं सुन्दरबालकं सुषुव उदपादयत् । षूङ प्राणिप्रसवे धातोर्लिट्। यं तच्छब्दनिर्दिष्टं बालकम् । वल्ली लता पुष्पतरुरित्यर्थः भानुमुखि भानौ मुखं भानुमुखं, भानुमुखं यस्यतदिति भानुमुखि सूर्यमुखि सुमं पुष्पमिव 'स्त्रियः सुमनसः पुष्पं प्रसूनं कुसुमं सुमम्' इत्यमरः । तन्नाम्नी पल्ली लघुग्रामो लघुप्रदेश इत्यर्थः। पल्लीशब्दस्यार्थः कुटीरोऽपि भवति । दधौ धारयामास । भानुमुखि पुष्पं तत्तरुलतेव भानुभक्तं बालकं मोतिरामं भोसिको दधारेतिभावः । बालक-सुमयोः पल्लीवल्ल्योश्च धारणागुणसाम्येनोपमालङ्कारः लक्षणं यथा साहित्य-दर्पणे- 'साम्यं वाच्यमवैधर्म्यं वाक्यैक्य उपमा द्वयोः ।' इति पल्लीवल्ली स्थिते-रन्त्यानुप्रासश्च । ततः संसृष्टिश्च ।।१२।।

रामोत्तरां मोत्यभिधां दधानः
प्रसूप्रियाङ्के ससुखं शयानः ।
मोतीति मुक्तार्थमुदीरितः स
मुक्तेव पश्चादभवद् विभूतिः ।।१३।।

'राम' शब्द पछाडि रहेको 'मोती' भन्ने नाम भएका अर्थात् मोतीराम नाम भएका, आमाको काखमा सुविस्तापूर्वक सुतेका, मुक्ता (मोती) को निमित्त नेपालीभाषामा मोती भनिने ती बालक, पछि राष्ट्रका मोती (रत्नविशेष) जस्तै विभूति भए ।

रामेति । रामोत्तरां रामो रामशब्द उत्तरपदे यस्यास्ताम् । मोत्यभिधां मोतीति याऽभिधा संज्ञा ताम् । दधानो बिभ्राणः । प्रसूप्रियाङ्के प्रस्वाः यः प्रियोऽङ्कस्तस्मिन् जनन्यभीष्टक्रोडे । 'जनयित्री प्रसूर्माता जननी' इत्यमरः । यद्वा प्रस्वोर्यः प्रियोऽङ्कस्तस्मिन् जनकजनन्यभीष्टक्रोडे । 'माता पितरौ प्रसू-जनयितारौ' इत्यमरः । ससुखं सानन्दं यथा तथा शयानः सुप्तः । मुक्तार्थं मौक्तिकार्थद्योतनाय मोतीति 'मोती' इति पदेन । नैपालिक्यां भाषायां मौक्तिक-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्यार्थो 'मोती' भवति । उदीरितः कथित आकारितो वा स पूर्वोक्तो बालकः। पश्चात् तज्जीवनानन्तरम् मुक्ता मौक्तिकमिव । 'अथ मौक्तिकम् । मुक्ता' इत्यमरः । 'कनकं कुलिशं नीलं पद्मरागं च मौक्तिकम् । एतानि पञ्चरत्नानि रत्नशास्त्रविदो विदुः' इत्युक्तिश्च । विभूतिरैश्वर्यं वा भाषायां 'राष्ट्रियविभूतिरीति सम्मानित व्यक्तित्वमित्यर्थः । अभवदभूत् । मुक्तेवेत्युपमा।।१३।।

अभ्रे निरभ्रे किरणावलीभि-
र्विराजमानोऽपि विभावरीशः ।
दृष्ट्वा प्रभाभिर्मृदुभासुराभि-
र्धौतं ह्रिया तं गगने नु लीनः ।।१४।।

बादल शून्य आकाशमा किरणै किरणले सुशोभित चन्द्रमा पनि चम्किलो कोमल कान्तिले धोइएका मोतीरामलाई देखेपछि लाजले आकाशमै बिलाउँथें कि ? अर्थात् मानिसको आँखालाई चन्द्रमालेभन्दा यिनको सौन्दर्यले बढ्ता आकर्षण गऱ्यो कि ?।

अभ्र इति । विभावरीशो विभावर्या ईशो विभावरीशो रजनीश्वरश्चन्द्र इत्यर्थः । 'विभावरीतमस्विन्यौ रजनी यामिनी तमी' इत्यमरः । निरभ्र आपो जलानि बिभर्ति धारयत इत्यभ्रम्, 'डुभृञ् धारणपोषणयोर्धातोः कप्रत्ययः । 'अभ्रं मेघोवारिवाहः स्तनयित्नुर्बलाहकः' इत्यमरः । निर्गतान्यभ्राणि यस्मात्तस्मिन् निरभ्रे मेघमुक्तेऽभ्रे व्योम्नि 'द्योदिवौ द्वे स्त्रियामभ्रं व्योमपुष्कर-मम्बरम्' इत्यमरः । किरणावलीभिः किरणानां मयूखानामावल्यः पङ्क्तयस्ताभिः प्रचुरकिरणैरित्यर्थः । मेघाभावात्स्वच्छ किरणैरिति यावत् । विराजमानोऽपि विशेषेण राजमानो भ्राजमानोऽपि । शुक्लपक्षस्य चन्द्रोऽपीत्यर्थः। मृदुभासुराभिर्मृदवश्च भासुराश्च मृदु भासुराः कोमलप्रकाशवत्यस्ताभिस्तथोक्ताभिः । विशेषण-योरपि कुपाणि खञ्जवदैच्छिकोपसर्जनत्वविवक्षया विशेषणसमासः। भासुरा शब्दे भञ्जभास भिदो धुरच्' इति धुरच् ततस्टाप् । प्रभाभिः कान्तिभि र्धौतं प्रक्षालितं तं बालं दृष्ट्वाऽवेक्ष्य ह्रिया लज्जयाऽऽत्मातिशासौन्दर्यं दृष्ट्वा सञ्जातया

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लज्जयेति भावः । गगनेऽभ्रे । लीनो लुप्तो नु तर्के । बाललावण्यं चन्द्रमसो वरीय इतिभावः । अत्र चन्द्रस्याऽलीनत्वेऽपि लीनत्वोक्तेरुत्प्रेक्षालङ्कारः ।।१४।।

विलोक्य बालाय पततपयस्कां
विलोकनीयामगलद्वयस्काम् ।
ज्येष्ठां प्रियां चात्मजमात्मरूपं
पिता दयाराम इतः प्रहर्षम् ।।१५।।

शिशुको लागि स्वतः दूध पग्रेर तप्तप् खसिरहेकी, जोवन नखस्केकी, अत एव हेरौं हेरौं जस्ती सुन्दरी जेठी पत्नीलाई र आफ्नो अनुहार बोकेको छोरोलाई देखेर शिशुका पिता दयाराम अत्यन्त आनन्दित भए। सुत्केरी दुधालु हुनु र हृष्टपुष्ट शरीरकी हुनु, जन्मेको शिशु छोरो नै हुनु, त्यसमा पनि ऊ आफ्नै अनुहारको हुनु, अझ झन् त्यसमा जेठी पत्नीले जन्माउनु इत्यादि आनन्दका कारण हुन् ।

विलोक्येति । बालायाऽर्भकाय 'क्रियार्थोपपदस्य च कर्मणि स्थानिनः' इति चतुर्थी । पततपयस्कां पय एव पयस्कम् । 'सर्वप्रातिपदिकेभ्यः स्वार्थे कन्' इति वार्तिकात् कन् । पततपयस्कं यस्यास्तां तथोक्तां स्खलत्स्तन्याम् । अगलद्वयस्कां वय एव वयस्कमत्राऽपि स्वार्थेकन् । अगलद्वयस्कं यस्यास्तां तथोक्तामच्युततारुण्याम् । अतएव विलोकनीयां प्रेक्षणीयां यौवनस्यह्रासाभावात्। ज्येष्ठां पूर्वां प्रियां जायाम् । ज्येष्ठशब्दाद् दयारामस्याऽन्याऽपि भार्याऽसीदिति लक्ष्यते । पुत्रप्रसूतिहेतोरपि प्रियाशब्दप्रयोगः । आत्मरूपमात्मनः स्वस्यरूप-माकृतिर्यस्मिंस्तम् । आत्मजमात्मनः स्वस्माज्जातस्तं स्वपुत्रम् । चाऽपि । विलोक्य प्रेक्ष्य। पिता बालस्यजनकः । 'नेप्तृ नेष्टृत्वष्टृहोतृपोतृभ्रातृजा-मातृ-मातृपितृदुहितृ' इति पाते राकारस्येत्वम् । दयाराम स्तदाख्यः पुरुषः । प्रहर्षं प्रकृष्टानन्दमितः प्राप्तोऽभूत् । इण गतौक्तः । नव प्रसूतिर्जाया पयस्विनी पुष्टतनुश्च ततो न दुग्धाभावयौवनह्रासौ, शिशुश्च पुत्र आत्मरूपवांश्चततो न नरकाद् भयं, न च जारपुत्र इति शङ्क्यः सोऽपि ज्येष्ठायां प्रियायां जात

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इत्यादीनि हर्षकारणान्यासन् । अत्र पतत्पयोऽगलद्वयः स्वरूपभागात्मजादि-पदानां प्रहर्षप्राप्तिहेतुत्वेस्थितेः काव्यलिङ्गालङ्कारः । लक्षणं यथा साहित्यदर्पणे- 'हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते' इति ।।१५।।

बालः सबालो ववृधे कलेव
चन्द्रस्य चन्द्रस्य च वर्णचौरः ।
प्रतीक्षते स्म प्रतिभाऽस्य विद्यां
शिखां कृशानोरिव चन्द्रचुल्लिः ।।१६।।

केश पालेका तथा कपूरको कान्ति भएका (गोरो वर्णका) ती बालक चन्द्रमाको कलाभैं, बढ्दै गए। कपूरै-कपूरले बनाएको चुह्लोले आगोको ज्वालालाई भैं, यिनको प्रतिभाले शिक्षा पर्खिरहेको थियो अर्थात् यिनको प्रतिभा कपूरमा आगाको ज्वाला पर्दाजस्तै शिक्षा पाउँदा भल्ल बल्ने थियो ।

बाल इति । सबालो बालैः सहितः सबालः सकेश आचूडाकर्म केशावपनत्वात् । 'चिकुरः कुन्तलो बालः कचः केशः शिरोरुहः' इत्यमरः । चन्द्रस्य च कर्पूरस्य च । 'धनसारश्चन्द्र संज्ञः सिताभ्रो हिमवालुका' इत्यमरः। वर्णचौरो वर्णस्य कान्तेश्चौरो हारक स्तत्सदृशवर्ण इत्यर्थः, गौरवर्ण इति यावत्। सबालत्वेन तमसः कर्पूरवर्णत्वेन चन्द्रमसः साम्यम् । अत एव चन्द्रस्येन्दोः। चन्द्रस्य कर्पूरार्थकत्वाच्चन्द्र शब्दे न पुनरुक्तिदोषः । कला षोडशो भागः । 'कला तु षोडशो भागः' इत्यमरः । इव यथा । ववृधेऽवर्धत अत्र चन्द्रकला बालकयोः साम्येनोपमा । अस्य बालकस्य प्रतिभा प्रखरा बुद्धिः प्रज्ञा वा । 'प्रज्ञा नवनवोमेषशालिनी प्रतिभा मता' इत्युक्तिः । चन्द्रचुल्लिश्चन्द्रस्य चुल्लिश्च-न्द्रचुल्लिः कर्पूरान्तिका कर्पूरै निर्मिता चुल्लिरित्यर्थः 'अश्मन्तमुद्धानमधिश्रयणी चुल्लिरन्तिका' इत्यमरः । कृशानोरग्नेः शिखां ज्वालामिव विद्यां शिक्षां प्रतीक्षते स्म प्रतीक्षां करोति स्म । 'अपरोक्षे च' इति लट् । अग्निज्वालाधानात् कर्पूर-चुल्लिरिव शिक्षादानात् तत्प्रतिभा वर्धिन्यासी दितिभावः । अत्राऽपि प्रतिभायाश्चन्द्रचुल्या, विद्याया कृशानु शिखया च साम्येनोपमालङ्कारः । ततः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संसृष्टिश्च ।।१६।।

निसर्गधीरः कलहातिदूरः
स्वकर्मवीरः कुल-बालसूरः ।
कर्णस्थचामीकरकर्णिकार-
श्रिया कुमारीव बभौ कुमारः ।।१७।।

धीर स्वभाव भएका, कल झगडाबाट अलग रहने, बालोचित आफ्ना काममा अडिग र वंशमा प्रभाती सूर्यजस्ता ती कुमार, कानमा सुनका कमलगट्टा लगाइदिंदा त, त्यसको शोभाले कुमारीजस्तै राम्रा देखिन्थे ।

निसर्गेति । निसर्गधीरो निसर्गेणधीरः प्रकृत्या धैर्यवान् । कलहातिदूरः कलहेभ्यो युद्धेर्ष्यादिभ्योऽतिदूरो विप्रकृष्टः शान्त प्रकृतिरित्यर्थः । स्वकर्मवीरः स्वस्याऽऽत्मनः कर्मसु कार्येषु वीरः समर्थो बालोचितकर्मकुशल इत्यर्थः कुलबालसूरो बालश्चासौ सूरो बालसूरः प्राभातिकसूर्यः कुलस्य वंशस्य बालसूर इति तथोक्तः । अथवा कुलस्य यो बालो बालकः स सूर इव 'उपमितं व्याघ्रादिभिः सामान्याप्रयोगे' इति तत्पुरुषसमासः । 'सूरसूर्यार्यमादित्यद्वा-दशात्मदिवाकराः' इत्यमरः । कर्णस्थचामीकर कर्णिकारश्रियाऽऽकर्ण्यतेऽनेनेति कर्णोऽप्प्रत्ययः । कर्णयोः श्रवणयोस्तिष्ठतो वर्तेते इति कर्णस्थौ 'सुपिस्थः' इति स्थः । कर्णस्थौ यौ चामीकरस्य काञ्चनस्य 'चामीकरं जातरूपं महारजतकाञ्चने' इत्यमरः कर्णिकारौ द्रुमोत्पलौ 'द्रुमोज्वलः कर्णिकारः परिव्याधः' इत्यमरः । तयोर्या श्रीः शोभा तथा तथोक्तया । कर्णस्थित-सुवर्णाभरणशोभयेत्यर्थः । कर्णिकारस्य वर्णप्रकर्षतया निर्गन्धतया च काञ्चना-भरणत्वेऽत्यौचित्यम् । कर्णिकारप्रसङ्गे कालिदासोयथा कुमार सम्भवे-वर्णप्रकर्षे सति कर्णिकारं दुनोति निर्गन्धतया स्म चेतः । प्रायेण सामग्र्यविधौ गुणानां पराङ्मुखी विश्वसृजः प्रवृत्तिः' इति । अत एव कुमारो बालकः । कुमारी 'वयसि प्रथमे' इति ङीप् । बालिका । इव यथा । बभौ शुशुभे । अत्रोपमावृत्यनुप्रासौ ।।१७।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कीनाशदोषापगमाय कम्रां
चक्रेऽस्य नासां जनकः सरन्ध्राम् ।
पुत्रीत्यतोऽमुं जहसुः सखाय-
श्चचाल चित्तं न तथाऽप्यमुष्य ।।१८।।

मृत्युदोष निवारणका लागि बाबुले यिनको राम्रो नाक छेडिदिंदा साथीहरूले यिनलाई छोरी भनेर गिज्याउन थाले, तथापि यिनको चित्त विचलित भएन ।

कीनाशेति । पिता जनको दयाराम इत्यर्थः । कीनाशदोषापगमाय कीनाशस्य यमराजस्य मृत्योरित्यर्थः । कृतान्ते पुंसि कीनाशः' इत्यमरः । यो दोषो दूषणं तस्यापगमः क्षयस्तस्मै । अस्य तनयस्य । कम्रां मनोहरां नासां धोणां 'क्लीवे घ्राणं गन्धवहा घोणा नासा च नासिका' इत्यमरः । सरन्ध्रां सच्छिद्रां चकार विदधे । कम्रां नासां सरन्ध्रां चकारेत्यनेन सौन्दर्यस्य विधाताद् विषादो व्यज्यते । अतोऽस्मात् कारणात् । सखायः सुहृदः । अमुं मोतिरामं पुत्री तनयेति कथयित्वा । जहसुरुपहासं चक्रुः । तथापि तादृश्यामवस्थायामप्यमुष्य कुमारस्य चित्तं चेतो न चचाल न चलितं बभूव । अत्र नासाच्छेदने कीनाशदोषापगमहेतुत्वात् सख्युपहासे नासाच्छेदनहेतुत्वाच्चोभयत्र काव्यलिङ्गालङ्कारः । लक्षणंयथा- 'हेतौ वाक्यपदार्थत्वे काव्यलिङ्गं निगद्यते। इति विश्वनाथः ।।१८।।

पितृव्यपत्न्या परिषेवणार्थं
प्राप्तस्य काशीं स्वपितुः प्रियार्थम् ।
तत्र प्रयान्तीं जननीं प्रकामः
स पञ्चवर्षोऽनुजगाम रामः ।।१९।।

काकीको सेवा खातिर काशी गएका बाबुको माया गर्दै आमा त्यहीं जान लाग्दा पाँच वर्षका मोतीराम पनि जिद्दी गरेर पछि लागे ।

पितृव्येति । पितृव्यपत्न्याः पितृव्यस्य पत्नी पितृव्यपत्नी तस्याः पितृ-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भ्रातृभार्यायाः परिषेवणार्थंशुश्रूषायै काशीं वाराणसीं मोक्षदायिसप्तनगरीष्वेकां नगरीमित्यर्थः । यथा मोक्षदायिकाः सप्तनगर्यः– "अयोध्या मथुरा माया काशी काञ्चिरवन्तिका। पुरी द्वारावती चैव सप्तैता मोक्षदायिकाः" इति प्राप्तस्य गतस्य । स्वपितुरात्मजनकस्य दयारामस्येत्यर्थः । प्रियार्थमभीष्टकार्यार्थम् । तत्र काश्याम् । प्रयान्तीं गच्छन्तीम् । जननीं मातरम् । पञ्चवर्षः पञ्च पञ्चसंख्यका वर्षाः सम्बत्सरा यस्य सः । पञ्चहायनः । प्रकामःप्रकृष्टः कामो मनोरथो यस्य स सोत्कण्ठ इत्यर्थः। स मोतिरामः । अनुजगामाऽनुययौ । अत्र पकारस्य बहुवारप्रयोगात्पादान्ते समस्वरव्यञ्जनप्रयोगाच्च वृत्यनुप्रासान्त्यानुप्रासौ शब्दालङ्कारौ संसृष्टिश्च ।।१९।।

भागीरथीं वीक्ष्य भगीरथस्य
कथाः समाकर्ण्य च सुव्रतस्य ।
स तेन तुल्यो भवितुं विपन्नां
चाद्धर्तुमैच्छत् स्वधरां विषण्णाम् ।।२०।।

तिनले भागीरथी देखेर तथा तपस्वी भगीरथ राजाको कथा सुनेर आफू त्यस्तै हुन र दुःखले नियाउरी भएकी जन्मभूमिको उद्धार गर्न सङ्कल्प गरे ।

स बालकः । भागीरथीं भगीरथस्येयं भागीरथी तां गङ्गाम् । 'भागीरथी त्रिपथगा त्रिस्रोता भीष्मसूरपि' इत्यमरः । सुव्रतस्य सुष्ठु व्रतं यस्य तस्य । तपस्विनः । दृढप्रतिज्ञस्य वा । भगीरथस्य तन्नामकसूर्यवंशीयनृपालस्य कथा गङ्गानयनादिवार्ताः । यथा श्रीमद्भागवते (९-९-१०) 'भगीरथः स राजर्षिर्निन्ये भुवनपावनीम् । यत्र स्वपितॄणां देहा भस्मीभूताःस्म शेरते' इति । समाकर्ण्य सम्यक् श्रुत्वा । तेन भगीरथेन तुल्यः सदृशो भवितुं विपन्नामापद्ग्रस्तां राणा-क्रूरप्रशासनविपत्तियुक्ता मित्यर्थः । अत एव विषण्णां विषादपूर्णां स्वधरा मात्मीयां पृथ्वीं स्वजन्मभूमिमित्यर्थः । उद्धर्तुमुन्नेतुं च । राणाप्रशासनान्मोचयि-तुमित्यर्थः । ऐच्छदकामयत । बाल्यादेव तस्मिन्, स्वजन्मभुवो भक्तिरभूदिति-भावः । अत्र राजर्षिभगीरथचरितवार्ताया मोतिरामजन्मभूद्धारेच्छाकर्माङ्गत्वेन

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्थितेरुदात्तं नामालङ्कारः । लक्षणं यथा साहित्यदर्पणे–'लोकातिशयसम्पत्ति-वर्णनोदात्तमुच्यते । यद्वापि प्रस्तुतस्याङ्गं महतां चरितं भवेत् ।' इति ।।२०।।

यदाष्टवर्षस्तनुजो बभूव
पिता तदाऽस्य द्विजतां पपार ।
आसाद्यते या व्रतबन्धनेन
द्विजस्य रक्ताच्च विनिर्गमेन ।।२१।।

जब छोरा आठ वर्षका भए, तब बाबुले यिनको द्विजत्वपूर्ण गरे, जुन द्विजकै रक्तबाट जन्मनाले र व्रतबन्ध संस्कार गर्नाले प्राप्त हुन्छ ।

यदेति । तनुज आत्मजः । यदा यस्मिन् काले । अष्टवर्षोऽष्टौ वर्षा यस्य सोऽष्टहायनो बभूवाभूत् । तदा तस्मिन् काले पिता जनकः । अस्य बालकस्य द्विजतां ब्राह्मणत्वम् द्विर्जायत इति द्विजः । 'अन्येष्वपि दृश्यते' इति जनेर्डः । 'मातुरग्रेऽधिजननं द्वितीयं मौञ्जिबन्धने' इति मनुस्मृतिः । द्विजस्य भावो द्विजता 'तस्य भावस्त्वतलौ' इति । तल्, तलन्तं स्त्रियामिति च । तां तथोक्ताम् । पपार पूर्णामकरोत् । पृपालनपूरणयोर्धातोः पूरणार्थे लिट् । या द्विजता । द्विजस्य प्रकृत्या ब्राह्मणस्य । क्षत्रियवैश्याश्च द्विजत्वे गणनीयाः । रक्ताद्रुधिरात् विनिर्गमेन निष्क्रमणेन द्विजकुले जन्मनेत्यर्थः । व्रतबन्धनेनो पनयनेन मौञ्जिबन्धनसंस्कारेणचेत्यर्थः । आसाद्यते प्राप्यते । बालकः स द्विजरक्ताज्जात एवाऽऽसीत्, पितृकृत व्रतबन्धसंस्कारात्त्वन्यज्जन्म प्रापातएव तस्य द्विजता पूर्णेति भावः । सामान्यार्थं विशेषार्थेन समर्थनादर्थान्तर-न्यासोऽलङ्कारः, लक्षणं यथा साहित्यदर्पणे– सामान्यं वा विशेषेण, विशेषस्तेन वा यदि । कार्यं च कारणेनेदं कार्येण च समर्थ्यते साधर्म्येणेतरेणार्थान्तर-न्यासोऽष्टधा ततः' इति ।।२१।।

सकौशलं संविविदे स्वभाषां
स पारसीं गां तत आसिषेवे ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गीर्वाणवाणीं त्वमृतायमानां
कण्ठेऽतिमात्रं विदधे रसज्ञः ।।२२।।

चलाख भएर पहिले तिनले आफ्नो भाषा बुझे, त्यसपछि लगनशील भएर फारसी भाषा सिके । अमृत जस्तो मीठो संस्कृतभाषा त रसप्रेमी उनको कण्ठमा हरदमै रहन्थ्यो ।

सकौशलमिति । स बालः । स्वभाषामात्मभाषां नैपालिकीं भाषामित्यर्थः। सकौशलं सनैपुण्यं यथा तथा संविविदे ज्ञातवान् । तत स्तदनन्तरम् । पारसीं पारस्यदेशे भवा पारसी तां पारसीं तज्जातीयाम् । पारसीत्यत्र 'तत्र भवः' इत्यण् स्त्रीत्वात् ङीप् च गां वाचं भाषामित्यर्थः । 'स्वर्गेषु पशुवाग्वज्रदिङ्नेत्र-घृणिभूजले, लक्ष्यदृष्ट्या स्त्रियां पुंसि गौः' इत्यमरः। पारसशब्दान्महाकविः कालिदासः स्मर्यते यथा रघुवंशे महाकाव्ये- 'पारसीकांस्ततो जेतुं प्रतस्थे स्थलवर्त्मना ।' इति । आषिसेवेऽसेवत । षेवृधातोर्लिट् । तु किन्तु । अमृतायमानां पीयूषायमाणाममृतकल्पामित्यर्थः। गीर्वाणवाणीं गीर्वाणानां वाणी ताम् । देववाणीं संस्कृभाषामित्यर्थः । रसज्ञो रसं जानातीति रसज्ञो रसिकः सन् कण्ठे गलेऽति-मात्रमतिशयं यथा तथा । 'अतिवेलभृशात्यर्थातिमात्रोद्गाढनिर्भरम्' इत्यमरः । विदधे विहितवान् स्थापितवानित्यर्थः । संस्कृतभाषायामस्य दक्षता विशिष्टा-ऽऽसीदिति भावः । अत्र पूर्वार्द्धे सकारस्य बहुप्रयोगाद् वृत्यनुप्रासः।।२२।।

'पन्ना'ऽभिषङ्गे परिवादिनीभि-
श्चिक्रीड षड्जस्वरमुन्नमय्य ।
जगौ च माधुर्यभरस्वरेण
बालोऽपि बालेव स पञ्चमेन ।।२३।।

तिनी प्रसिद्ध गायक 'पन्नालाल' को सङ्गतमा षड्ज राग चढाएर सितार बजाउँथे, बालक भएता पनि बालिकाजस्तै, अत्यन्त मीठो स्वरमा पञ्चम रागले पनि गाउँथे ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पन्नेति । स मोतिरामः । पन्नाभिषङ्गे पन्नालालसंज्ञकगायकसम्पर्के । नामैकदेशे नामग्रहणमित्युक्तेः । षड्जस्वरं षड्जरागम् । 'निषादर्षभगान्धार-षड्जमध्यमधैवताः । पञ्चमश्चेत्यमी सप्त तन्त्रीकण्ठोत्थिताः स्वराः' इत्यमरः। उन्नमय्योत्थाप्योच्चस्वरेणेत्यर्थः । परिवादिनीभिस्तन्त्रीभिः । 'विपञ्ची, सा तु तन्त्रीभिः सप्तभिः परिवादिनी' इत्यमरः । चिक्रीड क्रीडां चकार । परिवादिनी-स्वरेण साकं षड्जरागमगायदिति भावः । 'नासां कण्ठमुरस्तालुं जिह्वां दन्तांश्च संस्पृशन् । षड्भ्यः सञ्जायते यस्मात्तस्मात्षड्ज इति स्मृतः' इत्युक्तिः । बालोऽपि बालकोऽपि । बालेव बालिकायथा । माधुर्यभरस्वरेण मधुरस्य भावो माधुर्यं मधुरता 'गुणवचनब्राह्मणादिभ्यः कर्मणि च' इति ष्यञ् प्रत्ययः। तेनभरः पूर्णः स्वरः शब्दो यस्मिंस्तेन तथोक्तेन ।'चित्तद्रवी भावमयो ह्लादो माधुर्यमुच्यते' इति साहित्यदर्पणम् । पञ्चमेन पञ्चमरागेण 'वायुः समुद्गतो नाभेरुरोहृत्कण्ठमूर्द्धसु । विचरन् पञ्चमस्थान प्राप्त्या पञ्चम उच्यते' इत्युक्तिः। जगौ च गानमकरोच्च । स्वरस्याऽऽविर्भावे नारदस्योक्तिर्यथा–

'षड्जं रौति मयूरस्तु गावो नर्दन्ति चर्षभम् ।
अजावृकौ च गान्धारं क्रोञ्चो वदति मध्यमम्
पुष्पसाधारणे काले कोकिलो रौति पञ्चमम्।
अश्वस्तु धैवतं रौति निषादं रौति कुञ्जरः'
इति । बालोऽपि बालेवेत्यत्रोपमा ।।२३।।

कुशाग्रबुद्धेर्द्विजबालकस्य
तौर्यत्रिकेऽपि प्रतिभा ननर्त ।
तन्नर्तनं वीक्ष्य हि 'भारतेन्दु' -
स्तमालिलिङ्ग प्रणयेन बन्धुः ।।२४।।

कुशको टुप्पो जस्तो तीखो बुद्धि भएका ब्राह्मणपुत्रको प्रतिभा नृत्य-गीत-वाद्यमा पनि नाच्न थाल्यो । त्यही नाचेको देखेर प्रेमले बन्धु भएका भारतेन्दु हरिश्चन्द्रले तिनलाई अँगाले ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कुशाग्रेति । कुशस्याग्रं कुशाग्रं तद्वद् बुद्धिर्यस्य तस्य दर्भाग्रवत्तीक्ष्णमतेः। द्विजबालकस्य द्विजस्य यो बालकस्तस्य ब्राह्मणार्भकस्य । प्रतिभा प्रखरा बुद्धिः । तौर्यत्रिकेऽपि नृत्यगीतवाद्यत्रयेऽपि 'तौर्यत्रिकं नृत्यगीतवाद्यं नाट्यमिदं त्रयम्' इत्यमरः । ननर्त नृत्यमकरोत् । तीक्ष्णबुद्धेर्बालस्य प्रतिभा न केवलं भाषायां नृत्यगीतवाद्येष्वपि चमत्कारपूर्णाऽऽसीदिति भावः । तन्नर्तनं तस्याः प्रतिभाया नर्तनं नृत्यं चमत्कारितातिशयमित्यर्थः । वीक्ष्य दृष्ट्वा । भारतेन्दुर्भार-तेन्दुपदभाक्कश्चिद् विद्वान् । मनीषी हरिश्चन्द्र इत्यर्थः । प्रणयेन प्रेम्णा हेतौ तृतीया । बन्धुः स्वजनः सन् । जन्मसम्बन्धेनाऽबन्धुरपि प्रणयसम्बन्धेन बन्धुरिति भावः । तं बालम् । यथाऽध्यात्मरामायणे जटायुं प्रति रामस्योक्तिः- 'मत्कार्यार्थं हतोऽसि त्वमतोमे प्रियबान्धवः' इति । आलिलिङ्गाशिश्लेषाऽति-निकटसम्पर्के स्थापयामासेत्यर्थः । हीतिनिश्चयार्थे । कुशाग्रबुद्धेरित्यत्र लुप्तोपमालङ्कारः । लक्षणं यथा साहित्यदर्पणे- 'लुप्ता सामान्यधर्मादेरेकस्य यदि वाद्वयोः' । इत्यादिः ।।२४।।

शुक्रोपकण्ठे गुरुपुत्रतुल्यः ।
स देवयानीमिव दीप्तविद्यः ।
दिने दिने सुन्दरतामुपेतां
ददर्श भाषामथ भारतीयाम् ।।२५।।

हरिश्चन्द्रको सम्पर्कमा आएपछि, शुक्राचार्यको सम्पर्कमा रहेका बृहस्पति-पुत्र 'कच' जस्तै देखिने प्रज्ज्वलित विद्या भएका ती मोतीरामले दिनानुदिन सुध्रिंदै गएको हिन्दी भाषालाई दिनानुदिन तारुण्य वासनाले उज्यालिंदै गएकी शुक्रपुत्री देवयानी जस्तै देखे ।

शुक्रेति । अथानन्तरं 'भारतेन्दु' हरिश्चन्द्रसम्पर्का नन्तरमित्यर्थः । दीप्तविद्यो दीप्ता प्रज्वलिता विद्याऽधीतशास्त्रविषयो यस्य स विद्ययोज्ज्वल इत्यर्थः ।' स्त्रियाः पुंवद्भाषित पुंस्कारनूङ् समानाधिकरणेस्त्रियामपूरणीप्रियादिषु' इति दीप्तायां पुंवद्भावः । शुक्रोपकण्ठे शुक्रस्य शुक्राचार्यस्योपकण्ठोन्तिक-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्तस्मिन् । 'उपकण्ठान्तिकाभ्यर्णाभ्यग्रा अप्यभितोऽव्ययम्' इत्यमरः । गुरुपुत्रतुल्यो गुरोर्बृहस्पतेः यः पुत्रः सुतस्तेन तुल्यः सदृशः । दैत्यगुरोः शुक्राचार्यस्य समीपे स्थितो देवगुरोः पुत्रः कच इवेत्यर्थः । सञ्जीवनींविद्यामध्येतुं कचः शुक्राश्रममगमत् । तत्र तस्मात् स तत्पुत्र्या देवयान्या सह शिक्षामग्रहीदिति पौराणिकी कथा । स मोतीरामः । दिनेदिने प्रत्यहम् । सुन्दरतां सुन्दरस्यभावः सुन्दरता तां सौन्दर्यमुपेताम् । 'तस्यभावस्त्वतलौ' इति तल्, तलन्तं स्त्रियामिति च । प्रत्यहं संस्कारं प्राप्तामित्यर्थः । भारतीयां भारते भारत वर्षे भवा भारतीया ताम् । 'वृद्धाच्छः' इति छप्रत्ययः, छस्येय् च । भाषां वाणीं हिन्दीभाषा मित्याशयः । दिनेदिने सुन्दरतामुपेता मिति पुनरन्वयः कार्यः । प्रतिदिनप्रवर्धमान कचप्रेम्णा प्रदर्शितकामवासनारागेण च सौन्दर्यातिशयं प्राप्ताम् । देवयानीं तन्नाम्नीं शुक्रपुत्रीमिव ददर्श दृष्ट्वान् । गुरुपुत्रीत्वाद् यथा देवयानी कचस्याऽग्राह्या तथाऽनैपालिकीत्वाद् भारतीयाभाषाऽऽसीत् । अत्र कच मोतिरामयोर्देवयानी-भारतीयभाषयोश्च साम्यादुपमा ।।२५।।

कार्ये स कौशल्यमथ प्रदर्श्य
बभूव तस्यैक-सभा-सदस्यः ।
ददर्श भाषांप्रति भारतेन्दोः
कलां प्रतीन्दोरिव चाऽनुरागम् ।।२६।।

यसपछि मोतीराम काममा दक्षता देखाएर तिनै भारतेन्दु हरिश्चन्द्रका संस्थाका एक सदस्य भए । चन्द्रमाको कलाप्रति जस्तै, भारतेन्दुको भाषाप्रति अनुराग पनि तिनले देखे ।

कार्य इति । अथानन्तरम् । स मोतिरामः । कार्ये कर्मणि । कौशल्यं कुशलस्य भावः कौशल्यं तत्तथोक्तम् । दाक्ष्यम् । 'गुणवचनब्राह्मणादिभ्यः । कर्मणि च' इति ष्यञ् । प्रदर्श्य प्रकर्षेण दर्शयित्वा । तस्य भारतेन्दोः । एक-सभासदस्यः सभायाः परिषदः संस्थाया इति तात्पर्यम् । 'समज्या परिषद् गोष्ठी सभासमिति संसदः' इत्यमरः । लोक व्यवहृतौ सम्प्रति सभाशब्दस्याऽर्थः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सामान्येन गृह्यते। सभा लक्षणं यथा– यस्मिन् देशे निषीदन्ति विप्रा वेदविदस्त्रयः। राज्ञश्चाधिकृतो विद्वान् ब्राह्मणस्तां सभां विदुः' इति मनुस्मृतिः। सदस्योविधिदर्शी। 'सदस्याविधिदर्शिनः' इत्यमरः । सभायाः सदस्यः सभासदस्य एकश्चासौ सभासदस्य एकसभासदस्यः । सामान्यार्थे संस्थाया एकोजन इति तात्पर्यम्। बभूवाभूत् । इन्दोश्चन्द्रमसः कलां षोडशभागं प्रतीव। 'अभितः परितः समया निकषाहाप्रति योगेऽपि' इति द्वितीया 'कला तु षेडशो भागः' इत्यमरः। भारतेन्दोर्हरिश्चन्द्रस्य भाषांवाणींप्रति । अनुरागं भक्तिश्च । ददर्श दृष्टवान् । इन्दोः कलां प्रति भारतेन्दोर्भाषां प्रत्यनुरागयोः साम्येनोपमालङ्कारः ।।२६।।

तत्राऽन्धकारो गहनः सदा नु
विलोक्यते यत्र न चित्रभानुः
तथा स देशोऽपि शवोपमोऽस्ति
न यत्र काव्यस्य दिनोदयश्रीः ।।२७।।
इत्युक्तिभिस्तस्य तदन्तरा वाक्
पुस्फोट वल्ली तडितामिव स्राक् ।।
ततो हि काव्यामृतवर्षणाय
जातञ्च बीजं हृदि जागरायाः ।।२८।।(युग्मकम्)

त्यहाँ सधैं निष्पट्ट अन्धकार हुन्छ, जहाँ सूर्य देखिंदैनन्, त्यस्तै त्यो देश पनि निर्जीव समान हुन्छ, जहाँ काव्यको अरुणिम रोशनी हुँदैन ।

भारतेन्दु हरिश्चन्द्रका यस्ता कुराले बिजुली चम्कदा झल्किने रेखो झैं मोतीरामको अन्तर्वाणी खुल्यो । त्यसकारणले नै काव्यसुधाको वर्षाका लागि उनको हृदयमा बीज उत्पन्न भयो ।

तत्रेति । यत्र यस्मिन् स्थले । चित्रभानुः सूर्यः । 'द्युमणि स्तरणिर्मित्र-श्चित्रभानुर्विरोचनः' इत्यमरः। न विलोक्यते न संदृश्यते । तत्र तस्मिन् स्थले। सदा नित्यम् । गहनो गाढः । अन्धकारस्तमो भवतीतिशेषः । न्विति तर्केऽव्ययम्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अत्र 'नु' इत्यस्य स्थाने 'हि' इत्यव्ययं वरीयस्तथाप्यनुप्रासलोभेन न कृतम् । एतेन रसापकर्षोऽथवाऽर्थवैपरीत्यं न भवेत् । तथा तेनैव प्रकारेण यत्र यस्मिन् देशे । काव्यस्य कवितात्मककविकर्मणः । कवेर्भावः कर्म वा काव्यम् । कुशब्द इतिधातोः कौतीति व्युत्पत्या 'अच इः' इतिसूत्रेण इप्रत्यये कृते कविर्भवति । ततो 'गुणवचन ब्राह्मणादिभ्यः कर्मणिच' इतिष्यञः काव्यम्। काव्यलक्षणं यथाऽऽह व्यासमुनिरग्निपुराणे- 'काव्यं स्फुटदलङ्कारं गुणवद्दोषवर्जितम्' इति । यथाऽऽह ध्वनिकार आनन्दवर्द्धनः- 'काव्यस्यात्मा ध्वनिः' इति । यथा चाऽऽह क्षेमेन्द्रः - 'औचित्यं काव्यजीवितम्' इति । यथाऽऽह काव्यप्रकाशकारो मम्मट भट्टः- 'तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वाऽपि' इति । यथाह रसगङ्गाधरः पण्डितराजो जगन्नाथः- 'रमणीयार्थप्रतिपादकः शब्दःकाव्यम्' इति । यथाचाऽऽहाष्टादशभाषावारविलासिनीभुजङ्गः साहित्यदर्पणकारो विश्वनाथः- 'वाक्यं रसात्मकं काव्यम्' इति । स एवाऽऽह- 'चतुर्वर्गफलप्राप्तिः सुखादल्पधियामपि' इति । मम्मटभट्टस्तु 'काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये । सद्यः परिनिर्वृतये कान्तासम्मिततयोपदेशयुजे' इत्याह । दिनोदयश्रीर्दिनस्य दिवसस्योदयश्रीः प्रारम्भशोभाऽरुणराग इत्यर्थः । न, नविद्यते । स तादृशः काव्यश्रीरहित इत्यर्थः । देशोऽपि जनपदोऽपि। शवोपमः शवो मृतदेह उपमायस्य सः । निर्जीवतुल्य इत्यर्थः । अस्ति वर्तते। यथा सूर्याभावेऽन्धकारो भवति तथा काव्याभावे देशो निर्जीवो भवतीत्यर्थेन दृष्टान्तालङ्कारस्तल्लक्षणं यथा साहित्यदर्पणे- 'दृष्टान्तस्तु सधर्मस्य वस्तुनः प्रतिबिम्बनम्' इति । 'सदा नु, चित्रभानुः' इत्यत्रान्त्यानुप्रासश्च तस्य हरिश्चन्द्रस्य। इत्युक्तिभिरिति वचनैः । तदन्तरा मोतिरामहृदन्तर्वर्तिनी । वाग्वाण्यात्मध्वनिरित्यर्थः । तडितां विद्युताम् । 'तडित्सौदामनीविद्युच्चञ्चला चपला अपि' इत्यमरः । वल्लीलता विद्युल्लेखेवित्यर्थः । इव यथा । स्राग्द्राक् 'स्राग्झटित्यञ्जसाह्नाय द्राङ्मङ्क्षु सपदि द्रुते' इत्यमरः । पुस्फोट पुस्फुटे स्फुटा बभूवेत्यर्थः स्फुट विकसने धातोः परस्मै पदि लिट् । अत्र विद्युद्वाचोः स्फुरण साम्येनोपमालङ्कारः, ततोहि तस्माद्धेतोरेव । 'हि हेताववधारणे' इत्यमरः। काव्यामृत-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वर्षणाय काव्यं कविकृतिरेवाऽमृतं सुधा । रूपकं काव्यस्यामृत आरोपात् । तस्य वर्षणं वर्षा तस्मै । हृदि हृदये मोतिरामहृदय इत्याशयः । जागराया जागर्तेः । 'जागर्या जागरा द्वयोः' इत्यमरः । बीजं वपनीयकणः । यथा मृच्छकटिकनाटके बीजशब्दस्य प्रयोगः– 'बीजाञ्जलिः पतति कीटमुखावलीढः' इति । जातंचोत्पन्नं वाक्, स्राक्' इत्यत्रान्त्यानुप्रासः 'जातं च बीजं हृदि जागरायाः' इत्यत्र जकारस्य बहुप्रयोगाद् वृत्यनुप्रासश्च ।।२८।।

तत्प्रेरणायाः प्रतिबद्धबुद्धि-
रियेष भाषोन्नयनं स धीरः ।
जागर्तिरस्याः खलु सुप्तसर्व-
प्रबोधनस्यैव कृतेऽस्ति बीजम् ।।२९।।

भारतेन्दु हरिश्चन्द्रको प्रेरणाबाट दृढ प्रतिज्ञ, धैर्यवान्, मोतीरामले आफ्नो भाषाको उन्नति चाहे । निश्चय नै भाषाको जागरण, सुतेका सबैलाई ब्यूँझाउने कारण हो ।

तदिति । तत्प्रेरणायास्तस्य हरिश्चन्द्रस्य प्रेरणा चोदना तस्याः । प्रतिबद्धबुद्धिः प्रतिबद्धा दृढीकृता बुद्धिर्मतिर्येन सः । सप्रतिज्ञ इत्यर्थः । धीरो मनीषी 'धीरो मनीषी ज्ञः प्राज्ञः संख्यावान् पण्डितः कविः' इत्यमरः । स मोतिरामः । भाषाया नैपालिक्या भाषाया उन्नयनमुत्थापनं तत्तथोक्तम् । स्वराष्ट्रभाषोद्धारमित्यर्थः इयेषेच्छां चक्रे । 'इषु' इच्छायां धातोर्लिट् । अस्या भाषायाः। जागर्तिर्जागर्या । सुप्तसर्वप्रबोधनस्य कृते सुप्तानां निद्रितानां जागर्तिहीनानामित्यर्थः सर्वेषां समस्तानां यत्प्रबोधनं ज्ञानप्रदानं तस्य कृते तदर्थं बीजं कारणमस्ति । 'हेतुर्ना कारणं बीजम्' इत्यमरः । खल्वित्यव्ययं वाक्यालङ्कारे यथामरः– 'निषेधवाक्यालङ्कारजिज्ञासानुनये खलु' इति । अत्रश्लोके भाषाया जागर्तिः सर्वप्रबोधनबीजमिति सामान्यार्थेन भाषोन्नयनमियेषेति विशेषार्थसमर्थनरूपोऽर्थान्तरन्यासोऽलङ्कारः ।।२९।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मोतिवृत्तम्

अभ्यस्तविद्यं गुणरीतिहृद्यं
पद्यं यथा संस्कृतपण्डितस्य ।
अलोललीलं बुधसङ्गशीलं
बाल्यं नु वार्धक्यमभूदमुष्य ।।३०।।

जसमा विद्या पढिन्छ; जसमा सौन्दर्य, सौकुमार्य आदि गुणले राम्रो चालबालले हृदय पग्लिन्छ, जसमा उत्ताउलो खेलबाड छैन र जसमा जान्नेको सङ्गतप्रति रुचि छ, त्यस्तो यिनको बालककाल, माधुर्य आदि गुणले र वैदर्भी आदि रीतिले सुन्दर देखिने; ज्ञानको अभ्यास गरिने; उत्ताउलोपन नहुने र विद्वान्को मात्र सम्पर्कमा रहने संस्कृतका कविको कविताजस्तो थियो र बारम्बार ज्ञानको विषय लिने; दया दाक्षिण्य आदि गुण र मर्यादाले सुन्दर, चाञ्चल्यहीन एवं विद्वान् वा वृद्धको सङ्ग रुचाउने वृद्धकाल भयो कि !

अभ्यस्तेति । अभ्यस्तविद्यमभ्यस्ता विद्या यत्र तद् बहुव्रीहिसमासः । अभ्युपसर्गपूर्वकादसधातोःक्तष्टाप् चेत्यभ्यस्ता 'पुंवद्भाषितपुंस्कादनूङ्-समानाधिकरणेस्त्रियामपूरणीप्रियादिषु' इति पुंवद्भावः । विद्या विद्धातोः क्यप् ततष्टापू । विद्याः सन्ति चतस्रो वा चतुर्दश । चतस्रो यथा– 'आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्च शाश्वती' इति । आन्वीक्षिकी यथा– 'आन्वीक्षिक्यात्मविद्या स्यादीक्षणात्सुखदुःखयोः । ईक्ष्यमाणस्तया तत्त्वं हर्षशोकैर्व्युदस्यति' इति कामन्दकीनीतिः । त्रयी यथा वेदत्रयी ऋग्यजुः सामानीत्यर्थः वार्तायथा वैश्यवृत्तिर्वा व्यवसायात्मिका वृत्तिः । दण्डनीतिर्यथा– न्यायप्रशासनम् । 'वाग्दण्डोऽथ मनोदण्डः काय दण्डस्तथैव च । यस्यैते निहिता बुद्धौ त्रिदण्डीति स उच्यते' इति मनुस्मृतिः । चतुर्दश विद्या यथा– 'षडङ्ग मिश्रिता वेदा धर्म शास्त्रं पुराणकम् । मीमांसा तर्कमपि च एता विद्याश्चतुर्दश' इति । अभ्यस्तविद्यं बाल्यपक्षे– रटित शिक्षापाठम् । पद्यपक्षे– वार्धक्यपक्षे च –गृहीतज्ञानम् । 'अभ्यासेन च कौन्तेय वैराग्येण च गृह्यते' इति श्रीमद्भगवद्गीताविद्यायाः पर्यायशब्दो ज्ञानमपि भवति यथोपनिषदः 'विद्यया (ज्ञानेन)ऽमृतमश्नुते' इति।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मोतिवृत्तम्

गुणरीतिहृद्यं गुणाश्च रीतयश्च गुणरीतयोर्गुणरीतिभिर्हृद्यं गुणरीतिहृद्यं तत् । बाल्यपक्षे– सौन्दर्यसौकुमार्यादिगुणैः पालितानुशासनैश्च मनोहरम् । पद्यपक्षे– गुणा माधुर्यौजःप्रभृतयः । 'रसस्याङ्गित्वमाप्तस्यधर्माः शौर्यादयो यथा । गुणमाधुर्यमोजोऽथप्रसाद इति ते त्रिधा' इति विश्वनाथः । रीतयो वैदर्भी-गौड्यादिरीतयो यथा– 'पदसंघटना रीतिरङ्गसंस्थाविशेषवत् । उपकर्त्री रसादीनां सा पुनः स्याच्चतुर्विधा' इति विश्वनाथः । अतो माधुयादिगुणैर्वैदर्भ्यादिरीतिभिश्च सुन्दरम् । वार्धक्यपक्षे– गुणाः धर्माः सत्त्वादयो गुणाश्च, 'मौर्व्यां द्रव्याश्रितं सत्त्व शौर्यसन्ध्यादिके गुणः' इत्यमरः । रीतय प्रचारादयः, 'प्रचारस्यन्दयो रीतिः' इत्यमरः । धर्मप्रचारमनोहरम् । संस्कृतपण्डितस्य सदसदविवेकवती बुद्धिः पण्डा, पण्डा सञ्जाता यस्येति 'तदस्यसञ्जातं पण्डितः तारकादिभ्यइतच्' इतीतच् । पण्डितः संस्कृतः परिष्कृतः सिद्धहस्त इत्यर्थः स चासौ पण्डितः कवि र्वा संस्कृते देववाण्यां यः पण्डितो विद्वांस्तस्य । पद्यं श्लोको यथेव । अलोललील मालोलालीला यस्य तत् । बाल्यपक्षेऽचञ्चलक्रीडं बालस्यमोति-रामस्याऽसामान्यधीरस्वभावत्वात् । पद्यपक्षे स्थिरलेरवकेलि क्रियम्। वार्धक्य-पक्षेऽविद्यमानचञ्चलविलासम् । 'लीला विलासो विच्छित्तिर्विव्वोकः किल-किञ्चितम्' इति विश्वनाथः । 'लीलाविलासक्रिययोः' इत्यमरः । बुधसङ्गशीलं बुधानां यः सङ्गस्तस्मिन् शीलं यस्य तत् । बाल्यपक्षे–विज्ञजनसम्पर्कप्रकृति। पद्यपक्षे– कोविदसाङ्गतिकम् । वार्धक्यपक्षे वृद्धसङ्गरुचि वा विद्वत्सङ्गरुचि। 'विद्वान् विपश्चिद् दोषज्ञः सन् सुधीः कोविदो बुधः । इति 'बुधवृद्धौपण्डितेऽपि' इति 'शीलं स्वभावेसद्वृत्ते' इत्यमरः । अमुष्याऽस्य बाल्यं बालस्य भावः कर्म वा बाल्यं शैशवम् 'गुणवचन–ब्राह्मणादिभ्यः कर्मणि च' इति ष्यञ् प्रत्ययः। वार्धक्यं स्थावरम् । अभूत् । अत्रोपमोत्प्रेक्षाश्लेषालङ्काराणामङ्गाङ्गित्वात्' सङ्करालङ्कारः ॥३०॥

शृङ्गेषु सश्यामपयोधरेषु
प्राभातिकं ज्योतिरिवाऽस्य बाल्यम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अङ्गेषु कामान्धवयोधरेषु
व्यलोपि कालक्रमतः प्रकृत्या ।।३१।।

पहाडका चुचुरामा कालो बादल बस्ता बिहानी ज्योति झैं, शरीरका अङ्गअङ्गमा अन्ध भइने कुर्कुरे बैंश भरिंदा, यिनको बाल्यावस्था स्वभावतः हराउँदै गयो ।

शृङ्गेष्विति । अङ्गेष्ववयवेषु । कामान्धवयोधरेषु धरन्ति गृह्णन्तीति धराः पचाद्यच्, कामेन मदनेन कामवासनयेत्यर्थः, अन्धं यद् वयः प्रारम्भिक–यौवनं तस्य धरा स्तेषु तथोक्तेषु सत्सु । अस्य मोतिरामस्य । बाल्यं कौमारम्। शृङ्गेषु गिरिशिखरेषु सश्यामपयोधरेषु श्यामाः कृष्णा ये पयोधरा वारिवाहास्तैः सहिता स्तेषु तथोक्तेषु सत्सु । 'यस्य च भावेन भावलक्षणम्' इति सप्तमी । प्राभातिकं प्रातः कालिकम् । ज्योतिश्छविरिव प्रकृत्या निसर्गेण । कालक्रमतः समयक्रमात् शनैः शनैः । व्यलोपि विलुप्तम् । अत्र शृङ्गाङ्गयोः कृष्णमेघ कामान्धवयसोः प्रातर्ज्योतिर्बाल्यकालयोश्चरूपधर्मसाम्येनोपमालङ्कारः ।

अस्योत्तरोष्ठस्य नु लोमलेखा
द्विरेफरेखां विजिगाय भासा
विसारि-शोभा शकुलिध्वजस्य
चचार चित्ते क्षणभङ्गुराऽपि ।।३२।।

यिनको ओठका जूँघाको रेखीको सौन्दर्यले भँमराको ताँतीलाई जित्यो, थोरैबेरको लागि भए पनि काम वासनाको नयाँ राग चित्तमा पर्न थाल्यो ।

अस्य कुमारस्य । उत्तरोष्ठस्योपर्योष्ठभागस्म लोमलेखा रोमराजिः । नूतनरोमराजिरित्याशयः। भासा श्रिया द्विरफरेखां द्विरेफाणां भ्रमराणां या रेखालेखा ताम् । विजिगायाऽजयत् । नु तर्के तस्य नवोदितश्मश्रुशोभा भृङ्गावलिशोभाति–शायिन्यासीदिति भावः । द्विरेफ पुष्पलिड्भृङ्गषट्पदभ्रमरालयः' इत्यमरः । चित्ते हृदये । शकुलिध्वजस्य शकुली मीनो ध्वजे केतने यस्य तस्य काम–

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्येत्यर्थः। 'पृथुरोमा झषो मत्स्यो मीनो वैसारिणोऽण्डजः, विसारः शकुली, इति 'मदनो मन्मथो मारः पद्युम्नो मीनकेतनः' इति चामरः । विसारिशोभा विसारिणी चासौ शोभा विसारिशोभा प्रसरणशीला कान्तिः कामराग इत्यर्थः। क्षणभङ्गुरा सद्योविनाशिन्यपि । 'भाजभासभिदो धुरच' इति धुरच्प्रत्ययः । चचार चरतिस्म । यौवनाविर्भावे स्वभावतः कामरागश्चित्ते समुत्पन्नः परन्तु मनस्विनस्तस्य हृदये नस्थिरमतिष्ठदिति भावः । अत्रोप्रेक्षाऽलङ्कारः ।

शनैर्नवं यौवनमारुरुक्षुः
काव्यं सशृङ्गाररसं विधित्सुः ।
स एव नस्तस्य रसस्य वाचि ।
प्रवर्तकोऽभूत् कविताविलासी ।।३३।।

नयाँ जोवनमा उक्लिंदा उक्लिंदै शृङ्गाररस प्रधान काव्यलेख्न चाहने कवितासँग विलास गर्ने ती मोतीराम हाम्रो साहित्य (नेपाली साहित्य) मा शृङ्गाररसका प्रवर्तक भए ।

शनैरिति । शनैः क्रमशः । नवं नूतनं यौवनं तारुण्यम् । आरुरुक्षुरारोढुमिच्छुः । 'सनाशंसभिक्षउः' इतिसन्नन्तादुः । सशृङ्गाररसं शृङ्गाररससहितं शृङ्गाररसप्रधानमित्यर्थः । काव्यं कृतिं विधित्सुर्विधातुमिच्छुः । कविता विलासी विलसनशीलो विलासी कवितानां विलासी कविताविलासी कवित्वामोदी । स मोतिरामः । एव । नोऽस्माकं नेपालदेशवास्तव्यानां जनानामित्यर्थः । वाचि भाषायां साहित्य इति तात्पर्यम् । तस्य पूर्वोक्तस्य रसस्य शृङ्गाररसस्य। प्रवर्तकः पवर्तयिताऽभूत् ।।३३।।

तौर्यत्रिकज्ञं सुरवाग्रसज्ञं
कविं च तं पारसवाचि विज्ञम् ।
समग्रसंपूरणकाङ्क्षिणीव
प्राग्यौवनश्रीः सहसाऽऽलिलिङ्ग ।।३४।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नाच्न, गाउन र सितार आदि बजाउन जानेका; संस्कृत पढेका, फारसी भाषामा राम्रो दखल भएका र कवि पनि भएका मोतीरामलाई उनका यी सब गुणको उत्कर्ष चाहेर हो कि भने झैं यौवनको आरम्भिक शोभाले ढाक्यो ।

तौर्यत्रिकज्ञमिति । सहसा हसतीति हसो हासः । 'अथोहसः । हासो हास्यं च' इत्यमरः । हसेन सहिता सहसा प्रसन्नेत्यर्थः । प्राग्यौवनश्रीर्यूनो भावो यौवनं तस्य श्रीर्योवनश्रीः प्राक् चासौ यौवनश्रीः प्राग्यौवनश्रीस्तारुण्य प्रथमशोभा । तौर्यत्रिकज्ञं जानातीति ज्ञो 'इगुपधोज्ञाप्रीकिरः कः, कप्रत्ययः। तौर्यत्रिकस्य ज्ञस्तंतथोक्तं नृत्यगीतवाद्य वेत्तारम् । 'तौर्यत्रिकंनृत्य गीतवाद्यम्' इत्यमरः । सुरवाग्रसज्ञं सुराणां गीर्वाणानां या वाग्वाणीतस्या रसज्ञ आस्वाद-कस्तम् । पारसवाचि विज्ञं पारसानां पारस्यदेशवास्तव्यानां या वाक् भाषातस्या विज्ञम् । प्रवेत्तारम् । कविं च काव्यकारमपि । तं मोतिरामम् । समग्रसम्पूरण-काङ्क्षिणी समग्राणां सम्पूरणं सम्पूर्तिस्तत् काङ्क्षते वाञ्छति तच्छीलेति तथोक्ता। तौर्यत्रिकवेत्तृत्वस्य, संस्कृतज्ञत्वस्य, पारसभाषा विज्ञत्वस्य, कवित्वस्य च हितसम्पूर्ति कामेत्यर्थः । इवोत्प्रेक्षायाम् । आलिलिङ्ग शिश्लेष। अत्रो-त्प्रेक्षालङ्कारः ।।३४।।

मुखे स्मितश्रीर्वचने श्रुतेर्गीः
कण्ठे युवत्या मधुरस्वरर्द्धिः ।
लेखे च शृङ्गाररसस्य सिद्धि-
र्निधाय पादान् ननृतुर्नु तस्य ।।३५।।

तिनको मुखमा मुस्कानकी लक्ष्मीले; वचनमा वेदकी सरस्वतीले, घाँटीमा युवतीको मीठो स्वरको समृद्धिले र लेखमा शृङ्गाररसकी सिद्धिले खुट्टा राखेर नाचे कि ! अर्थात् तिनको मुखमा मुस्कानको शोभा थियो । बोलीमा वेदको वाणि थियो, घाँटीमा युवतीको जस्तो मीठो आवाज थियो र साहित्यमा शृङ्गाररस थियो ।

तस्येति । तस्य मोतिरामस्य । मुखे वदने । स्मितश्रीः । स्मितस्य श्रीः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्मितश्रीरीषद्धास्यलक्ष्मीर्हास्यशोभेत्यर्थः । 'ईषद्विकासिनयनंस्मितं स्यात् स्पन्दिताधरम्' इति साहित्य दर्पणम् । 'स (हासः) मनाक् स्मितम्' इत्यमरः। सम्पत्तिः श्रीश्चलक्ष्मीश्च' इत्यप्यमरः । वचने भाषणे । श्रुतेर्वेदस्य वेदानामित्याशयः । श्रीः सरस्वती । 'ब्राह्मी तु भारतीभाषा गीर्वाग्वाणी । सरस्वती' इत्यमरः । कण्ठे गले युवत्यास्तरुण्या । 'युवन् शब्दात् 'यूनस्ति' इति तिप्रत्ययः। मुधुरस्वरर्द्धिर्मधुरो मिष्टो यः स्वरः कण्ठशब्दस्तस्यर्द्धिः प्राचुर्यम् । 'कण्ठे सुधा वसति वै खलु सज्जनानाम्' इति सदुक्तिः । लेखे च काव्यात्मक लेखायामपि शृङ्गाररसस्य सम्भोगविप्रलम्भात्मकशृङ्गाररसस्य सिद्धिः सफलता' पादान् चरणान् । निधाय स्थापयित्वा । ननृतुर्नृत्यं चक्रुः । नूत्प्रेक्षायाम्। यौवनारूढस्य तस्य मुखे स्मितं भाषणे वेदवाक्, कण्ठे स्वरमाधुर्यं युवत्या इव, लेखे शृङ्गाररसः प्राचुर्येणाऽऽसन्निति भावः । अत्रोत्प्रेक्षालङ्कारः ।।३५।।

स्वनिर्मितं पारसवाचि गीति-
नाट्यं स संदर्शयितुं समैच्छत् ।
कथाऽस्ति-कस्याऽपि रतेच्छुकन्यां
शिश्लेष पारस्यनृपेन्द्रपुत्रः ।।३६।।

फारसी भाषामा आफूले बनाएको गीति नाटक प्रदर्शन गर्न उनले चाहेका हुन्, जसको कथा छ- 'फारस देशका राजकुमारले आफ्नो प्रेममा लालायित भएकी कसैकी कन्यालाई वरण गरे' ।

स्वनिर्मितमिति । स मोतिरामः । पारसवाचि पारसभाषायाम् । स्वनिर्मितमात्मरचितं गीतिनाट्यं गीतिमयनाटकम् । संदर्शयितुं नाट्यमञ्चे प्रदर्शयितुम्। समैच्छत् समैहत । कथा नाटकीयकथा । तत्रेत्याध्याहार्यः । अस्तिवर्तते । पारस्यनृपेन्द्रपुत्रः पारस्यस्य पारस्यदेशस्य यो नृपेन्द्रः सम्राट्। तस्य पुत्रः सूनुः पारसराजकुमार इत्यर्थः । कस्याऽपि कस्यचनाऽपि । नेदिष्ठ भूपतेरिति ज्ञेयम् । रतेच्छु कन्यां सुरतोत्कबालां तेनसह रन्तुकामामित्यर्थः, इच्छुरित्यत्र 'विन्दुरिच्छुः' इतीषेश्छत्वम्, उश्च । 'कन्या त्वजातोपयमा सलज्जा नवयौवना'

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इति साहित्यदर्पणम् । शिश्लेषाऽलिलिङ्ग । राजकुमारोपि साधारणस्य जनस्य पुत्रीमुवाहेत्यर्थः । मोतिरामस्यैतन्नाट्यलेखनेन वैतत्प्रदर्शन कौतुकेन महत्साधारणजनवर्गवर्तिभेदविच्छेदनेच्छा दृश्यते ।।३६।।

प्रेमप्रदानाय कलाविधानै-
यां याः कुमार्यो जुहुवुर्मुहुस्तम् ।
तास्ताः स तज्ज्ञो न तिरश्चकार
न सङ्गमाद् वा समलंचकार ।।३७।।

सम्पर्कमा आएका जुन जुन कुमारीले तिनलाई प्रीतिप्रदान गर्न भावचेष्टाद्वारा निमन्त्रणा गरे, ती–ती कुमारीलाई भाववेत्ता तिनले न हेय दृष्टिले हेरे, न त मिलनको आनन्द दिए, केवल मध्यस्थ रहे ।

प्रेमेति । या याः कुमार्योऽजातोपयमाः कन्याः सम्पर्कमागता या याः कुमार्य इत्यर्थः । कलाविधानैरिङ्गितादिभिस्तं मोतिरामम् । प्रेमप्रदानाय प्रणयरसदानाय प्रीतिप्रदानार्थमितिभावः । मुहुर्वारंवारं जुहुवुराजुहुवुर्निमन्त्रया-मासुः । तज्ज्ञस्तदिङ्गितवित् । स मोतिरामः । तास्ता यच्छन्दनिर्दिष्टाः कुमारीः। न तिरश्चकारोपेक्षां नाऽकरोत् । वाऽथवा । सङ्गमात्स्वयोगाद्रतिदानादित्यर्थः। न समलंचकार न व्यभूषयत्, रतिदानेन स्त्रियः – सौन्दर्यं वर्धत इत्याशयात्। यत्र तत्र प्राप्ता रत्युत्सुकाः कुमारीः स हेयदृष्ट्या नाऽवलोकयत्, रति दानेनच नामोदयत्, मध्यस्थरीत्यैवाऽवर्ततेति भावः । एतेन मोतिरामस्य रसिकत्वा-धानेऽपि वा शृङ्गाररसप्रियत्वेऽपि चारित्र्यपालनं दृश्यते ।।३७।।

स यौवने पेशलकेशराशौ ।
दधौ वराशिग्रथितं शिरस्त्रम् ।
सदा दधारोद्गमनीयवस्त्रे
संव्यान-नैपालिककञ्चुके च ।।३८।।

उनी जवानीमा मुलायम केशमाथि बराठले बनेको टोपी लगाउँथे र सधैं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

धोएको धोती, भोटो, नेपाली दौरा त्यसमाथि उपर्ना पनि कस्तथे ।

स इति । स मोतिरामः । यौवने तारुण्ये । पेशलकेशराशौ पेशला मृदवो ये केशाः कचास्तेषां राशिः पुञ्जस्तस्मिन् । मृद्वर्थे पेशलशब्दस्य प्रयोगो यथा रघुवंशे महाकाव्ये ११/४५ । 'शैलसारमपि नाति यत्नतः पुष्पचाप मिव पेशलं स्मरः ।' इति । अमरस्तु 'चारौ दक्षेच पेशलः' इति । वराशिग्रथितं वराशिना स्थूलशाटकेन ग्रथितं निर्मितम् । 'वराशिः स्थूलशाटकः' इत्यमरः। शिरस्त्रं शिरस्त्रायत इति शिरस्त्रं शिरोवस्त्रम् । 'टोपी' इति भाषायाम् । दधौ धृतवान् । सदा नित्यम् ।। उद्गमनीयवस्त्रे धौतवस्त्रयुगलम् । 'धोती भोटो' इति भाषायाम् । तत्स्यादुद्गमनीयं यद्धौतयोर्वस्त्रयोर्युगम्' इत्यमरः । 'सा मङ्गलस्नान विशुद्धगात्री गृहीतपत्युद्गमनीयवस्त्रा' इति कुमारसम्भवम् (७/१९) । संव्यान नैपालिककञ्चुके च नैपालिकानां नेपालदेशवास्तव्यानां कञ्चुकं वासो (दौरा इतिभाषाम्) नैपालिककञ्चुकं संव्यानं चोत्तरीयं च नैपालिककञ्चुकं च संव्याननैपालिककञ्चुके द्वन्द्वः समासः 'संव्यानमुत्तरीयं च ऐतनाऽस्य राष्ट्रियवेशे रुच्यतिशयो व्यज्यते दधार दधौ । स्वभावोक्तिरलङ्कारः । पूर्वार्धे शकारस्य बहुप्रयोगेण वृत्यनुप्रासश्च ।।३८।।

भाले त्रिपुण्ड्रं स गलेऽक्षमालां
नैपालिकीं पाण्डुलिपिं च पाणौ ।
पादूद्वयं पादयुगे च गृह्णन्
मनस्विनीनामपि हृज्जहार ।।३९।।

निधारमा त्रिपुण्ड्र, घाँटीमा रुद्राक्षमाला, हातमा नेपाली किताबको पाण्डुलिपि, खुट्टामा जुत्ता लगाउँदा त तिनले मनस्विनी नारीहरूको पनि हृदय हरण गरे ।

भाल इति । स मोतिरामः । भाले ललाटे । त्रिपुण्ड्रं भस्मरेखात्रयम् । 'त्र्यम्बकं यजामहेसुगन्धिम्पुष्टि वर्द्धनम् । उर्व्वारुकमिव बन्धनान्मृत्योर्मुक्षीय-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मामृतात् ।' इति यजुर्वेदीयमन्त्रोच्चारपूर्वकं गृहीतभष्मरेखात्रयमित्यर्थः । एतेनतस्य सदाचारित्वं दृश्यते। गले कण्ठे । अक्षमालां रुद्राक्षस्रजम् । 'रुद्रस्याऽक्षणःसमुत्पन्नं रुद्राक्षमितिकथ्यते' इतिरुद्राक्षमाहात्म्यम् । रुद्राक्षस्य नामानि यथा- 'रुद्राक्षश्च शिवाक्षश्च सर्वाक्षो भूतनाशनः, पावनो नीलकण्ठाक्षो हराक्षश्च शिवप्रियः ।' इति । गुणा यथा- 'रुद्राक्षमम्लमुष्णं च वातघ्नं कफनाशनम् । शिरोर्तिशमनं रुच्यं भूतग्रहविनाशनम्' । इति च धन्वन्तरी राजनिघण्टुः । एतेन तस्य शिवभक्त्या सहाऽऽयुर्वेदवित्त्वं व्यज्यते । पाणौ हस्ते । नैपालिकीं नेपालवाङ्मयविरचिताम् । पाण्डुलिपिममुद्रितलेखम् । ऐतनाऽस्यमातृभाषानुरागित्वं लक्ष्यते । 'पाण्डुलेखेन फलके भूमौ वा प्रथमं लिखेत् । न्यूनाधिकं तु संशोध्य पश्चात् पत्रे निवेशयत् ।' इति व्यासमुनिः । पादयुगे चरणयुगले । पादूद्वयमुपानहौ । ''पादूरूपानत् स्त्री' इत्यमरः । चाऽपि गृह्वन् दधत् सन् । मनस्विनीनां प्रशस्तचित्तानां वनितानामपि हृन्मनो जहार हृतवान् दर्शनादेवसञ्जातश्रद्धयेत्यवगम्यम् । अत्रापि स्वभावोक्तिलरङ्कारः ।।३९।।

रसेच्छुकः को युवको न पश्येद्
बिल्वस्तनीं प्रार्थितकामकेलिम् ।
वृथा विचिन्त्येत्यसती पिशाच्य-
ओं श्रोतुमीयुः, श्रवणात् तु भग्नाः ।।४०।।

'काम-विनोदका लागि आशय प्रकट गर्ने बेल फाँचे सुन्दरीलाई कुन रसिक युवक नहेरिहला ?' भन्ने इत्यादि व्यर्थका कुतर्कना गरी सतीत्व पालन नगर्ने पिशाचिनी स्त्री 'ओं' भन्ने स्वीकार सूचक शब्द सुन्न उनको नजिकै आए, सुन्न त सुने त्यो ओम्, तर त्यो ॐ मन्त्र सुन्नासाथ ती पिशाचिनीहरू टिक्नै सकेनन्, भागे ।

रसेति । रसेच्छुको रसस्य शृङ्गारसस्येच्छुकोऽभिलाषी को युवकः को नाम तरुणः । प्रार्थितकामकेलिं कामस्य केलयः कामकेलयो मन्मथक्रीडाः सम्भोगादिक्रिया इत्यर्थः । पार्थिता याचिताः कामकेलयो यया ताम् । 'विहारे

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सह कान्तेन क्रीडितं केलिरुच्यते' इति विश्वनाथः । बिल्वस्तनीं बिल्वौमालूराविव स्तनौ कुचौ यस्यास्ताम् । पृथुल पयोधरामिति भावः । 'स्वाङ्गाच्चोपसर्जनदसंयोगोपधात्' इति ङीष् । 'बिल्वे शाण्डिल्यशैलूषौ मालूरश्रीफलावपि' इत्यमरः। न पश्येन्नविलोकयेत्, पश्येदेवेत्यर्थः । अपेक्षां कुर्यादिति भावः । इतीत्थं वृथा व्यर्थं विचिन्त्य तर्कयित्वा असती पिशाच्यः पिशितमाचमन्तीतिपिशाचाः स्त्रियां पिशाच्यः, असत्यश्चताः पुश्चल्यश्चताः पिशाच्यः प्रेतस्त्रियोऽसती पिशाच्यः। वाऽसत्य एव पिशाच्योऽसती पिशाच्यः । पुंश्चली धर्षिणी बन्धक्यसती कुलटेत्वरी' इयमरः । ओमेवं स्वीकृतिसूचकशब्दमित्यर्थः । अहं त्वां गृह्णामीति वचनमिति भावः । 'ओं प्रश्नेऽङ्गीकृतौ रोषे' इति विश्वः। श्रोतुमाकर्णयितुं प्राप्तुमित्यर्थः । ईयुर्ययुः । इण् गतौ धातोर्लिट् । तं प्रापुरित्यर्थः। तु किन्तु । श्रवणादाकर्णनात् । ओमिति प्रणवस्य पावनध्वने; श्रावणाद्धेतो, भग्ना पलायिताः। वैदिकमन्त्रोच्चारणे कथं प्रेतादयस्तिष्ठन्ति, पलायन्त्येव। यदाशया पुंश्चल्यस्तदन्तिकं गता स्तासां तदाशा भग्नेति भावः । ओमित्यत्रश्लेषः। बिल्वस्तनीमित्यत्रोपमा । ओंश्रोतुमीयुस्तच्छ्रवणेन तु भग्ना इति विरोधः ओमिति प्रणवोच्चारणश्रवणेन भग्ना इति तत्परिहारः । एतेषामलङ्काराणां व्यामिश्रस्थितेः संसृष्टिरलङ्कारः ।।४०।।

स जागरित्रीभिरपायि नेत्रै-
राश्लेषि निद्रालुभिरात्मसुप्तौ ।
ध्यानेऽप्यचुम्बि प्रमदाङ्गनाभि-
स्तथापि रामारमणोऽभवन्नो ।।४१।।

जोवनको मद चढेका स्त्रीहरूमध्ये जागा रहेका जतिले तिनलाई आँखैले नअघाउञ्जेल हेरे, निदाएका जतिले सपनामा अँगालो मारे र अरूहरूले कल्पनामा चुम्बन गरे, तथापि रमणीहरूसँग ती लस्सिएनन् वा रामदेखिन् पर भएनन् ।

स इति । जागरित्रीभिर्जागरणशीलाभिः । जागृधाते स्तृच्प्रत्ययः स्त्रियां ङीप् च प्रमदाङ्गनाभिर्यौवनमत्तकामिनीभिः 'विशेषस्त्वङ्गनाभीरुः कामिनी

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वामलोचना' इत्यमरः । नेत्रैर्लोचनैरपायि पीतः । पाधातोश्चिण् । निर्भर मालोकित इत्यर्थः । निद्रालुभिर्निद्रां प्राप्ताभिः । निद्राशब्दात् 'स्पृहि गृहि पति दयिनिद्रातन्द्रा श्रद्धाभ्यः आलुच्' इत्यालुच् । आत्मसुप्तावात्मनः सुप्तिस्तस्यां तथोक्तायां स्वस्वप्ने आश्लेषि- आलिङ्गितः । श्लिषचिण् । ध्यानेऽपि चिन्तनेऽपि अचुम्बि चुम्बितः । चुम्बतेश्चिण् । तथाप्येतादृश्यामवस्थायामपि । रामारमणो रामाणां रमणीनां रमणो विलासी वा रामस्य भगवतो रामचन्द्रास्याऽरमणोऽप्रियो रामस्याऽभक्त इत्यर्थः । नोऽभवन्नाभूत् ।।४१।।

चन्द्राननानां नवयौवनानां
दृष्ट्वाऽपि कामं कमनीयतां सः ।
निर्वर्त्य नेत्रे परिशुद्धवृत्त्यै
विचारयामास विचारशीलः ।।४२।।

भर्खरै वैंश चढेका चन्द्रमुखीहरूको लोभ्याउने सौन्दर्य प्रशस्त देखेतापनि विवेकी तिनले तिनीहरूबाट आँखा फर्काएर पवित्र वृत्तिका लागि चिन्तन गरे ।

चन्द्रेति । नवयौवनानां प्रत्यग्रतारुण्यानाम् । चन्द्रनानामिन्दु मुखीनां सुन्दरीणाम् । कमनीयतां सुन्दरताम् । कामं पर्याप्तं यथा तथा दृष्ट्वाऽप्यालोक्यापि विचारशीलो विवेकवान्। स मोतिरामः । नेत्रे नयने । निर्वर्त्य ताभ्यः परावर्त्य परिशुद्धवृत्त्यै परिशुद्धा या वृत्तिस्तस्यै तथोक्तायै पवित्रव्यापाराय । विचारयामास चिन्तयामास । सुन्दरीणां सौन्दर्यं कामं दृष्ट्वाऽपि तत्र स नलिप्तो बभूव । तस्मात् सौन्दर्यान्नेत्रे निर्वर्त्यदृष्टिदोषपरिमार्जनाय चिन्तयति स्म चेति सरलो-भावः ।।४२।।

आङ्ग्लप्रशिष्टैः परतन्त्रतायां
स्थितां क्षितिं वीक्ष्य हि भारतीयाम् ।
आयाद् दयाराम इवोपशल्यं
तेनात्मनीनां निज राजधानीम् ।।४३।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मोतिवृत्तम्

अंग्रेजको कठोर प्रशासनले भारतभूमि परतन्त्र देखेर, आफ्नो कल्याण गर्ने आफ्नै देशको राजधानीमा मोतीरामलाई साथै लिई दयाराम आए, तर त्यो राजधानी ठूलो ठाउँबाट आउँदा वा विकास केही नहुँदा गाउँजस्तो लाग्दथ्यो ।

आङ्ग्लेति । दयारामो मोतिरामपिता । भारतीयां भारते भवा भारतीया ताम् । 'वृद्धाच्छः' इति छप्रत्ययः 'छस्येय्च । क्षितिं पृथ्वीम् । भारतभूमि-मित्यर्थः । 'धराधरित्री धरणिः क्षोणिर्ज्याकाश्यपी क्षितिः' इत्यमरः । आङ्ग्लप्रशिष्टेराङ्ग्लानां प्रशिष्टि स्तस्याः । आङ्ग्लजन कठोर प्रशासनाद्धेतोः। 'अववादस्तु निर्देशो निदेशः शासनं च सः' शिष्टिश्चाज्ञा' इत्यमरः । परतन्त्रतायां पारतन्त्र्ये स्थितां निषण्णाम् । वीक्ष्य दृष्ट्वा हि 'आत्मनीनामात्मनो हिताऽऽत्मनीना तां तथोक्ताम् । आत्मन्विश्व जनभोगोत्तर पदात् खः इति । 'आत्माध्यानौ खेः प्रकृतिभावः 'उपशल्यमिव ग्रामान्तमिव ग्राममिवेति तात्पर्यम् । विशालदेशा-दागतत्वाद्, विकासाभावाद् वोपशल्यमिव । 'ग्रामान्तमुपशल्यं स्यात्' इत्यमरः। निजराजधानीं निजस्य स्वस्य राजधानी प्रधाननगरी तां तथोक्ताम् । कान्तिपुरीमित्यर्थः । धीयन्तेऽस्या मितिधानी 'करणाधिकरणयोश्च' इति ल्युट्। राज्ञां धानी राजधानी ताम् । 'प्रधाननगरी राज्ञां राजधानीति कथ्यते' इति शब्दार्णवः । तेन मोतिरामेण 'सहयुक्तेऽप्रधाने' इति सहार्थे तृतीया । आयादा-गच्छत् ।।४३।।

दिने द्विवारं कनकावतंसं
बिभ्राणमभ्रंकषमुत्प्रशंसम् ।
दृष्ट्वा तुषाराम्बरमद्रिराजं
स्वभूश्रियं स प्रशशंस रामः ।।४४।।

दिनको दुईपटक (विहान र साँझ) सुनको श्रीपेच धारणा गर्ने; ठूलो प्रशंसा पाएका; मेघसम्म पुगेका अग्ला र हिमवस्त्रधारी पर्वतराज हिमालयलाई देखेर मोतीरामले आफ्नी पृथ्वीको सौन्दर्यको निकै प्रशंसा गरे ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दिन इति । स पूर्वोक्तः । रामो मोतिरामो नामैकदेशेनाम ग्रहणमित्युक्त्या। दिने चतुर्विंशतिंघटिकावधिसमयेऽहोरात्रमित्यर्थः । दिनस्य परिभाषायां रात्रेरप्यन्तर्भावात् । एतेन सन्ध्ययोरप्यन्तर्भावोज्ञेयः । द्विवारं वारद्वयम् । प्रभातसन्ध्ययोरित्याशयः । कनकावतंसं कनकस्य सुवर्णस्येवाऽवतंसो भूषणं तत् । सूर्यस्य सायंकालिकारुणरागत्वात् । बिभ्राणं दधानम् । अभ्रंकषमभ्रात् कष् खच् मुमागमश्च । मेघस्पर्धिनमत्युन्नतमित्यर्थः । उत्प्रशंसमुन्नता प्रशंसा श्लाधा यस्य तम् । तुषाराम्बरं तुषारो हिममेव वस्त्रं यस्य तम् । 'अवश्यायस्तु नीहारस्तुषारस्तुहिनं हिमम्' इत्यमरः । 'अम्बरं व्योम्नि वाससि' इति चामरः' अत्राम्बरशब्दस्य प्रयोगो राजशब्दार्थस्यौचित्यनिर्वाहाय । अद्रिराजमद्रीणां राजेत्यद्रिराजः शैलाधिपतिस्तं हिमालयमित्यर्थः । 'राजाहः सखिभ्यष्टच्' इति टच्प्रत्ययः । दृष्ट्वाऽऽलोक्य । स्वभूश्रियं स्वभुवोया श्रीस्ताम् । आत्मधरासौन्दर्यं नेपालसौन्दर्यमित्यर्थः । प्रशशंस वर्णयामास ।।४।।

हिमोज्ज्वलाभिः सलिलप्रदाभि-
र्दुर्गायिताभिर्बहुदेवताभिः ।
शैलं शिखाभिः स सदा स्वभूमे-
स्त्रातारमन्तः करणेन मेने ।।४५।।

हिउँले उज्याला, पानीका दाता, किल्ला स्वरूप भईकन देवताहरू बसेका चुचुराहरूले गर्दा हिमालयलाई उनले आफ्नै देशका रक्षक हुन् भनेर भित्री हृदयले माने ।

हिमेति । हिमेन तुहिनेनोज्ज्वला अवदातास्ताभिः हिमस्थितेर्दुगमा-भिरित्यपि व्यज्यते । सलिलप्रदाभिर्जलदायिनीभिर्नदीहेतुकाभिरित्यर्थः । दुर्गायिताभिर्दुर्गस्वरूपाभीराज्याङ्गत्वेनस्थिताभिरित्यर्थः । 'स्वाम्यमात्य-सुहृत्कोषराष्ट्र दुर्गबलानि च । राज्याङ्गानि इत्यमरः । बह्व्यो नैका देवता देवा अन्नपूर्ण गौरीशङ्करादि देवता वा जलदेवताः स्थलदेवता वनदेवता धनदेवता

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

औषधदेवता इत्यादिकिा यासु ताभिः । एतेन सर्वसम्पन्नाभिः इति व्यज्यते । यथा कालिदासः कुमारसम्भवे महाकाव्ये (१/१) 'अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः' इति । शिखाभिः शृङ्गैर्हेतौ तृतीया । शैलमद्रिं हिमालयमित्यर्थः । स्वभूमेरात्म पृथिव्याः । स्वदेशस्येत्यर्थः । त्रातारं रक्षकम् अन्तः करणेन चेतसा । मेनेऽमन्यतास्वदेशरक्षकत्वे हिमजल-दुर्गदेवस्थितिहेतुत्वात् काव्यलिङ्गालङ्कारः ॥४५॥

अन्यांश्च शैलान् सवनान् विशालान्
तत्र स्त्रवज्झर्झरनिर्झरांश्च ।
विलोक्य लावण्यलवासवेन
मौग्ध्यं दयारामसुतो जगाम ॥४६॥

जङ्गलसहितका अरू ठूला पहाडहरू र पहाडबाट झरेका बाजा बजेजस्ता झर्नाहरू हेरेर सौन्दर्यरूपी मदिराको मादले दयारामका छोरा विमूढ भए ।

विशालान् विपुलान् । सवनान् वनैर्विपिनैः सहितास्तान् । अन्यांश्चा-परानपि । शैलान् पर्वतान् तत्र तेषु पर्वतेषु । स्त्रवज्झर्झरनिर्झरांश्च स्त्रवन्तः स्खलन्तो ये झर्झरा वाद्य विशेषा इव निर्झराझरा स्तांस्तथोक्तान् । 'वाद्य प्रभेदा डमरु-मड्डु-डिण्डिम-झर्झरा' इति 'वारिप्रवाहो निर्झरो झरः' इति चामरः । विलोक्य दृष्ट्वा । दयारामसुतो दयारामसूनुर्मोतिराम इत्यर्थः लावण्य-लवासवेन लावण्यलवः सौन्दर्यकण एवाऽऽसवः सीधुस्तेन । 'मैरेय मासवः सीधुः' इत्यमरः । सौन्दर्यावलोकनसञ्जातहर्षातिशयेनेत्यर्थः । मौग्ध्यं मुग्धस्य भावो मौग्ध्यं तत्तथोक्तम् । 'गुणवचन ब्राह्मणादिभ्यः कर्मणि च' इति ष्यञ्। 'मुग्धः सुन्दरमूढयोः' इत्यमरः । जगाम ययौ, प्रापेत्यर्थः । सौन्दर्यालोके मूढोऽभवदिति सरलो भावः । अत्र नकार झकार रकार लकाराणां बहु प्रयोगाद् वृत्यनुपासो नाम शब्दालङ्कारः' झर्झरा इवनिर्झरा' इत्यत्रोपम-याऽर्थालङ्कारश्च ॥४६॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लब्ध्वा सदारस्य पितुर्निदेशं
यदाङ्ग्लविद्याध्ययनं व्यधात् सः ।
न तेन मम्लौ स्थिरचित्तदीप्तः
स्वसंस्कृतेः स्तोकमपि प्रकाशः ।।४७।।

मातापिताको आज्ञा पाएर तिनले अंग्रेजी पढे, त्यसको पढाइले प्रबल चित्तमा बलेको आफ्नो संस्कृतिको प्रकाश अलिकति पनि धमिलो भएन ।

लब्ध्वेति । स मोतिरामः । सदारस्य दारैः सहितस्तस्य सदारस्य 'भार्याजायाऽथ पुंभूम्नि दाराः स्यात्तु कुटुम्बिनी' इत्यमरः । पितुर्जनकस्य । निदेशमाज्ञांलब्ध्वा प्राप्य पित्रोरनुमतिं प्राप्येत्यर्थः । यत् आङ्ग्लविद्याध्ययन-माङ्ग्लानां गोरण्डानां या विद्या भाषा तस्या अध्ययनं पठनं तत्तथोक्तम् । व्यधादकरोत् । व्युपसर्गपूर्वकधृञ् धातोर्लङ् । तेनाऽध्ययनेन । स्थिर चित्तदीप्तः स्थिरमचञ्चलं यच्चित्तं स्वान्तं तस्मिन् दीप्तः प्रज्वलितः । स्व संस्कृते रात्मसंस्कारस्य स्वधर्मस्येत्यर्थः । प्रकाशोज्योतिः स्तोकमपीषदपि। न मम्लौ नम्लानो बभूव । म्लै हर्षक्षये धातोर्लिट् ।।४७।।

योषां नवोढामिव तां स भाषां
समाललम्बे वयसोऽग्रबिम्बे ।
नान्याः सपत्नीत्वमिता यतस्ता
नपूर्वमानस्खलिता अभूवन् ।।४८।।

उनले उमेरको पहिलो प्रहरमा नवविवाहिता स्त्रीजस्ती त्यो भाषालाई ग्रहण गरे । अरू संस्कृत फारसी आदि भाषाहरू पनि सौताको भाव प्राप्त गरेका भएनन्, किनभने तिनीहरू पूर्व सम्मानबाट वञ्चित थिएनन् ।

स मोतिरामः । वयस आयुषः । अग्रबिम्बे पूर्वच्छायायां प्रथम प्रहर इत्यर्थः । तां पूर्वोक्तां भाषां वाणीमाङ्ग्लविद्यामित्यर्थः । नवोढां सद्यः कृतोद्वाहां

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

योषामिव स्त्रियं यथा । 'स्त्री योषिदबला योषा नारी सीमन्तिनी वधूः' इत्यमरः। समाललम्बे संजग्राह । समोपसर्गपूर्व, लविधातो रात्मने पदि लिट्' । अन्याः संस्कृतपारसादिभाषाः । सपत्नीत्वं सापत्न्यं कलहमिति भावः । इता गता न। यतो हि । ता भाषाः संस्कृत पारसादि भाषाः । पूर्वमान स्खलिताः । प्राक्सम्मानच्युताः । नाभूवन् नासन् ।।४८।।

संप्राप्तवान् 'देव' ममात्यपुत्रं
सतीर्थ्यमात्मप्रकृतिं स मित्रम् ।
जनेष्टयज्ञस्य तु वह्नये तं
शशाक कर्तुं ह्यरणिं न कामम् ।।४९।।

आफ्नै स्वभावका मन्त्रिपुत्र देवशमशेर उनका सहपाठी मित्र भए, तर दुनियाँले चाहेको कर्मरूपी यज्ञको अग्निका लागि उनले तिनलाई राम्ररी अरणि (आगो निकाल्न मथन गरिने भलायो जस्तो काठ) बनाउन सकेनन् ।

संप्राप्तवानिति । स मोतिरामः । आत्मप्रकृतिं स्वनिसर्गम् । अमात्यपुत्रं मन्त्रिसूनुं देवशमशेरम् । सतीर्थ्यं सहपाठिनम् । "सतीर्थ्यास्त्वेक गुरवः" इत्यमरः । मित्रं सखायं संप्राप्तवान् समवाप । प्रगतिशीलः सहपाठी मन्त्रिपुत्रोदेवशमशेरस्तस्य मित्रं बभूवेति भावः । तु किन्तु । जनेष्टयज्ञस्य जनैर्मनुष्यैः स्वराज्यवासिभिरित्यर्थः । इष्टोऽभिलषितो यो यज्ञो यागस्तस्य तथोक्तस्य । जनवाञ्छितराणाप्रशासनमुक्तियज्ञस्येत्यर्थः । वह्नयेऽग्नये । तादर्थ्ये चतुर्थी । तं देवशमशेरम् । अरणिं निर्मन्थ्यदारु । 'निर्मन्थ्यदारुणि त्वरणिः' इत्यमरः । कर्तुं विधातुम् । अग्न्युत्पादनाय निर्मन्थ्यदारुवद् देवशमशेरंराणा-प्रशासनमुक्तियज्ञायाऽग्रणीं कर्तुमितिभावः । कामं पर्याप्तं यथेष्टमित्यर्थः । नशशाक समर्थो न बभूव । हीतिनिश्चयबोधकमव्ययम् ।।४३।।

वातायनालीनघटस्तनाभिः
कृत्वा रणं चाक्षुषमङ्गनाभिः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जिताभिराभिः प्रहितं स पत्रं
मेने नु भाषामृतपूर्णपात्रम् ।।५०।।

झ्यालमा घडा जस्ता ठूला स्तन अड्याएर बसेका सुन्दरीहरूसँग उनले निकै आँखा लडाए। वश पारेका यिनीहरूको प्रेमपत्र त उनलाई आफ्नो भाषारूपी अमृतले भरिएको भाँडो झैं लाग्यो, अर्थात् पठाएका प्रेमपत्रको भाषा शैली देख्दा आफ्नो भाषा कति मीठो रहेछ भन्ने ज्ञानभयो ।

वातायनेति । स मोतिरामः । वातायनालीभिघटस्तनाभिर्घटाविवस्तनौ घटस्तनौ वातायनेषु गवाक्षेष्वालीनौ संसृक्तौ घटस्तनौ कुम्भकुचौ पीनपयोधरा वित्यर्थो यांसा तास्ताभिस्तथोक्ताभिः । घटस्तनावित्यत्र 'स्वाङ्गा' च्चोपसर्जना दसंयोगोपधात्' ङीषभावपक्षे अजाद्यतष्टाप्' इति टाप् । अङ्गनाभिः प्रशस्तमङ्गं-यासांस्ताभिः सुन्दरीभिः । नगच्यां सुन्दर्यो वातायनान्मार्गे पुरुषान् विलोकयन्ति। अतो नगरसुन्दरीभिरित्यर्थः । 'विशेषस्त्वङ्गनाभीरुः कामिनी वामलोचना' इत्यमरः । चाक्षुषं चक्षुषोऽयं चाक्षुस्तं तथोक्तं नैत्रं रणं युद्धं कृत्वा विधाय वातायनस्थाभिर्ललनाभिः सह परस्परावलोकनं सुतरां कृत्वेत्यर्थः। जिताभीरणे पराजिताभिर्नयनावलोकेन वशीकृताभिरित्यर्थः । आभिरङ्गनाभिः। प्रहितं प्रेषितं पत्रं प्रेमपत्रम् । भाषामृत पूर्णपात्रं भाषा गीर्नैपालिकी भाषैवाऽमृतं सुधा तेन पूर्णं भरितं पात्रं भाजनं मेनेऽजानात् । प्रेमपत्रे भाषामाधुर्यातिशयं प्रापेत्यर्थः। नगरसुन्दरीभिः प्रेषितप्रेमपत्रस्थभाषाशैलीर्दृष्ट्वा स्वभाषा कीदृशी मनोहरास्तीति तस्य ज्ञानं बभूवेति भावः । न्विवितर्के । घटस्तनावित्यत्र स्वभाषामृतमित्यत्र चोपमारूपकौ । पत्रममृतपूर्णपात्रं न्वित्युत्प्रेक्षा च । अङ्गिन्योत्प्रेक्षया सङ्करालङ्कारः ।।५०।।

स सप्तभाषाभिरिवोद्धताभि-
र्विलासिकाभिर्विललास भूरि ।
तदोपयेमेऽवनिदेवपुत्रीं
लक्ष्मीं दयापूर्वपदीं वधूटीम् ।।५१।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मदोन्मत्त रमणी जस्ता सातओटा भाषा (नेपाली, नेवारी, संस्कृत, अंग्रेजी, हिन्दी, बङ्गाली र फारसी) सित राम्ररी खेले अर्थात् उनले ठूला–ठूला सात भाषा राम्ररी जाने । त्यसैबेला, हलहलाउँदो वैंश चढेकी ब्राह्मणपुत्री दयालक्ष्मीलाई विहा पनि गरे ।

स इति । स मोतिरामः । उद्धताभिर्मदोत्तेजिताभिः । विलासिकाभिर्विलासिनीभिरिव सप्तभाषाभिः । सप्तगीर्भिर्नैपालि–नैवारि–संस्कृताङ्‌ग्लवङ्ग–हिन्दीपारसीतिकथिताभिर्भाषाभिरित्यर्थः । 'सह युक्तेऽप्रधाने' इति सहार्थे तृतीया। भूच्यत्यर्थं यथा तथा विललास रेमे । व्युपसर्गपूर्वलसधातोर्लिट् । रसिको मोतिरामः सप्तभाषाविद् बभूवेति सरलो भावः । विलासो नायिकाया यथा साहित्यदर्पणे– 'यानस्थानासनादीनां मुखनेत्रादिकर्मणाम् । विशेषस्तु विलासः स्यादिष्टसन्दर्शनादिना' इति । नायकस्याऽपि तत्रैव यथा– 'धीरा दृष्टिर्गतिश्चित्रविलासे सस्मितं वचः' इति । तदा तस्मिन् काले । वधूटीमल्प वयस्कां नवयुवतिमित्यर्थः । वयसि प्रथमे' इति ङीप् । वधूटी शब्दस्य प्रयोगो यथा भाषा परिच्छेदे– 'गोपवधूटीदुकूलचौराय' इति । दयापूर्वपदीं दयाशब्दपूर्ववर्तिनीम् । लक्ष्मीं तन्नाम्नीम् । अवनिदेवपुत्रीं भूसुरसुतां ब्राह्मणकन्यामित्यर्थः। स उपयेम उवाह । अत्र भाषारमणीनां रमणधर्मसाम्या–दुपमालङ्कारः ।।५१।।

तन्वैकया सा रमणी प्रियस्य
बह्वङ्गनावर्धित कम्रभावम् ।
अपूपुरत्सोमलतेव तर्षं
पत्यै सुपत्नी हि ददाति तृप्तिम् ।।५२।।

सुन्दरीहरूको सम्पर्कले बढाएको तिनको काम वासनालाई ती रमणीले एउटै शरीरद्वारा मादक पेयले प्यास झैं तृप्त गराइन्, किनकि असल पत्नी नै पतिलाई तृप्ति दिन्छन् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तन्वेति । सा विवाहिता । रमणी रामा । एकयैकसंख्यया । तन्वा शरीरेण । 'स्त्रियां मूर्तिस्तनुस्तनूः' इत्यमरः । प्रियस्य भर्तुः । बह्वङ्गजावर्धित कम्रभावं बह्व्यः प्रचुरा या अङ्गनाः सुन्दर्यस्ताभिर्वर्धितो वृद्धिंनीतो यः कम्रभावः काम्यरागः 'कम्रः कामयिताऽभीकः' इत्यमरः । तम् । सोमलता सोमनामकर-सदायिनीवल्लरी । सोमो देवपेयपदार्थम् । पुरा युगे यज्ञकर्मण्यस्यावश्यकत्व-मासीत् । तर्षं तृषामिव । अपूपुरत् पूरयामास । एतेन दम्पत्योः कोकदाक्ष्यं लक्ष्यते । हि यतः । सपत्नी सुभार्या । पत्यैभर्त्रे। सम्प्रदाने चतुर्थी । तृप्तिं सौहित्यम् । 'सौहित्यं तर्पणं तृप्तिः' इत्यमरः ददाति यच्छति । अत्रोत्रपमा-र्थान्तरन्यासावलङ्कारौ ।।५२।।

'पश्यामि मुग्धे ! दृशि हृद्यरागं
विलोक्य सायं धर धैर्य मेवम्' ।
संव्याहरन्तं तमभावयत् सा
कृत्वा हरि स्वं मुखमायताक्षी ।।५३।।

'हे रमणि ! तिम्रो आँखामा हृदयको वासना छ । साँझको बेला हेरेर धैर्य धारण गर' यस्तो भन्ने तिनलाई ती दीर्घलोचनाले आफ्नो वदन हरियो अर्थात् निन्याउरो (हरि) बनाएर प्रेरित गरिन् ।

पश्यामीति । हे मुग्धे! सुन्दरि । 'मुग्धः सुन्दरमूढयोः' इत्यमरः। दृशि लोचने । तव नयनयोरित्याशयः । हृद्यरागं हृदि भवो हृद्यो हृद्यश्चासौ रागो हृद्यरागस्तम् । हृदयस्थमदनविकारम् 'पश्यामि विलोकयामि । तव हृद्गतकामभावं जानामीत्यर्थः । सायं सन्ध्यां विलोक्य दृष्ट्वा । धैर्यं धीरतां धर गृहाण । रतिः सन्ध्यायां निषिद्धा, प्रतीक्षस्व कियद् घटिका इतिभावः । यथाह व्यासमुनिः श्रीमद्भागवते (तृ. २१-२३) 'अथाऽपि काममेतं ते प्रजात्यै करवाण्यलम् ।' यथा मां नातिवोचन्ति मुहूर्त्तं प्रतिपालय' । एषा घोरतमा वेला घोराणां घोरदर्शना।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चरन्ति यस्यां भूतानि भूतेशानुचराणि ह । एतस्यां साध्वि ! सन्ध्यायां भगवान् भूतभावनः । परीतो भूतपर्षद्भिर्वृषेणाटति भूतराट्' इति । एवमनेन प्रकारेण संव्याहरन्तं सम्यगगदन्तं तं पतिम् । आयताक्ष्यायते अक्षिणी यस्याः सा दीर्घलोचना सुन्दरीत्यर्थः । सा नववधूः । स्वमात्मीयं मुखं मुखमण्डल मित्याशयः । हरि हरितं श्याममित्यर्थः कान्तिहीन मित्याशयः। हृधातोरि-निप्रत्ययाद्धरीति पदं निष्पन्नम् । यथा रघुवंशे महाकाव्ये श्यामार्थे (३/४३) हरिशब्दः – शतैस्तमक्ष्णामनिमेषवृत्तिभिर्हरिं विदित्वा हरिभिश्च वाजिभिः' इति । यथा चैतादृशः प्रयोगः श्रीमद्भागवते (६-१४-२१) 'लक्षयेऽलब्ध-कामंत्वांचिन्तया शवलं मुख' मिति । कृत्वा विधाय । तं पतिम्। अभावयदप्रेरयत्। सन्ध्यायामपि सा स्त्रीस्वभावजेन गुणेन तं सुरतायाऽप्रेरयदित्यर्थः । यथा श्रीमद्भागवतेऽपि (तृ. ३-१९) सैवं संविदिते भर्त्रा मन्मथोन्मथितेन्द्रिया । जग्राह वासो ब्रह्मर्षेर्वृषलीव गतत्रपा' इति ।।५२।।

ततः सहासं हरिशब्दपूर्वं
व्यधात् स संज्ञां 'वदनं' रमण्याः ।
गाढोपगूढां पुलकाधिरूढां
चुचुम्ब चैनां चतुरोनवोढः ।।५४।

प्रेरणा पाएपछि ठट्टा गर्दै तिनले 'हरि वदन' भन्ने यिनको उपनाम राखे भर्खर विवाह गरेका यी रतिकलामा चलाक मोतीले कस्सिएको आलिङ्गनमा यिनलाई रोमाञ्चित तुल्याउँदै, चुम्बन गरे !

तत इति । ततस्तत्पश्चात् प्रेरणानन्तरमित्यर्थः । स पतिः । सहासं परिहासपूर्वकं यथा तथा हरि शब्दपूर्वं 'हरि' पदपूर्ववर्ति वदनं हरिवदनमिति यावत् । रमण्या सुन्दर्या स्तत्पत्न्या इत्यर्थः । उपसंज्ञामुपनाम व्यधादकृतवान् प्रियाया उपनाम हरिवदनमिति चकारेत्यर्थः । गाढोपगूढां दृढालिङ्गिताम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अत एव पुलकाधिरूढां रोमाञ्चपूर्णाम् । एनां वधूम् । नवोढः सद्यः कृतविवाहः 'चतुरो रतिकलाभिज्ञःसन् । चुचुम्ब चुम्बनमप्यकरोत् ।।५४।।

स्वधर्मपत्न्या मृदुलाधरस्य
रसं समाचम्य महोत्सवार्थी ।
उन्मुक्तलापे भृशमाससाद
शक्तिं प्रदीप्तामिव वाक्सुधां सः ।।५५।।

ठूलो आनन्दको अवसर प्राप्त गर्न चाहने तिनले आफ्नी धर्मपत्नीको कोमल ओठको रस पान गरेर, लज्जा वा केही कुराको पनि बन्धन नरहेको स्वतन्त्र प्रेमालापमा भाषारूपी, अमृतलाई प्रज्वलित शक्ति जस्तै पाए ।

स्वेति । महोत्सवार्थी महांश्चासावुत्सवोमहोत्सवो महानन्दावसर स्तस्यार्थी काङ्क्षी स पतिः स्वधर्मपत्न्या धर्मार्थं स्वर्गादिलोकप्रापकपुण्यकर्मार्थं पत्नी भार्येति धर्मपत्नी शास्त्रोक्तविध्यनुसारं परिणीतां पत्नीमित्यर्थः । स्वस्याऽऽत्मनो धर्मपत्नी 'पत्युर्नोयज्ञ संयोगे' इति नकारो ङीप् तस्याः । मृदुलाधरस्य कोमष्ठस्य रसं भावनावर्धितकामोद्दीपनरसम् । समाचम्य सम्यगाचमनं कृत्वा निर्भर पीत्वेत्यर्थः यज्ञोत्सवारम्भ आचमनमिव रतोत्सवारम्भ ओष्ठपानं कृत्वेतिभावः। अत्र 'समाचम्य इत्यनेन निधुवन महोत्सवस्य यज्ञत्वे ध्वनिः । उन्मुक्त लापे उन्मुक्तः स्वतन्त्र स्त्रपायाराहित्याद्वा व्यापारादीनामभावात् । स चासौ लापो वार्ता दम्पत्योः परस्पर निर्बन्ध प्रेमालाप इत्यर्थः, तस्मिंस्तथोक्ते । वाक्सुधां वागेव सुधातां भाषामृतम् 'ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती' इत्यमरः । प्रदीप्तां प्रज्वलितां शक्तिं सामर्थ्यमिव काव्यशक्तिमिवेत्यर्थः । भृश मत्यर्थं यथा तथा । आससाद प्राप । अत्रोपमोत्प्रेक्षा चालङ्कारौ ।५५।।

न तस्य शृङ्गाररसस्य जीव्या ।
भाषैव योषा अपि सृष्टि नव्याः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दृदर्श पूःस्त्रीजयिवीक्षणानि
स ग्रामकन्येक्षणदर्पणे हि ।।५६।।

तिनको शृङ्गाररसको आजीविका भाषा मात्र भएन ! सृष्टिमा नौला देखिने स्त्रीहरू पनि भए, तर गाउँले केटी (आफ्नी पत्नी) का आँखाको ऐनामा उनी शहरका आइमाईलाई जित्ने हेराइदेख्तथे ।

नेति । तस्य मोतिरामस्य । शृङ्गाररसस्य सम्भोगविप्रलम्भात्मक-शृङ्गाररसस्य । जीव्याऽऽजीविका साधनमित्यर्थः । भाषैव न, केवला नैपालिकी भाषा नासीत् । सृष्टिनव्याः सृष्ट्यां विधिसर्गे नव्या नूतना सुन्दर्य इत्यर्थः । या स्त्रियः । 'स्त्री योषिदबला योषा नारी सीमन्तिनी वधूः' इत्यमरः । अभूवन्नित्य-ध्याहार्यः । स मोतिरामः । ग्रामकन्येक्षणदर्पणे ग्रामकन्यायाः । ग्रामबालायाः स्वपत्न्या इति भावः । यदीक्षणं यन्नयनं तदेव दर्पणो मुकुर स्तद्दर्पण इव वा तस्मिन् । 'लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी' इति । 'दर्पणे मुकुरादर्शौ' इति चामरः । पूःस्त्रीजयि वीक्षणानि पूःस्त्रीर्नगरनारीर्जयन्तीति श्रियाऽतिक्रामन्तीति पूःस्त्रीजयीनि तानि च तानीक्षणानि विलोकनानि तानि तथोक्तानि । 'पूःस्त्री पुरी नगर्य्यौ वा पत्तनं पुटभेदनम्' इत्यमरः । ददर्श दृष्टवान् हीति निश्चयत्वे । स सकौतुकं पुरस्त्रीः पश्यन्नपि स्वदारेष्वेवाऽरमतेति निगूढभावः ।।५६।।

निजकृतरचनायां वारमुख्याप्रशस्त्यै
हरिवदनमयौक्षीत् स स्मृतेरेव पत्न्याः ।
प्रणयिनि भवतीत्थं भावनं नाऽत्र चित्रं
हरिवदनमनाख्यं भूषणं वा त्रिलोक्याः ।।५७।।

तिनले आफ्नो रचनामा नाचगानका लागि ख्याति पाएका वेश्याहरूको बयान गर्न जुन 'हरि वदन' पद प्रयोग गरेका छन्, त्यो 'हरिवदन' उपनाम भएकी आफ्नी पत्नीको सम्भनाबाट गरेका हुन् । प्रेमीमा यस्तो कुरा हुन्छ नै ! यसमा

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आश्चर्य मान्ने कुरा छैन अथवा हरिवदन अर्थात् भगवान् विष्णुको मुख तिनै लोकको नाम नभएको अलङ्कार हो र उनले यसको प्रयोग गरेका हुन् ।

निजेति । निजकृतरचनायां स्वनिर्मितकृतौ स्वकाव्य इत्यर्थः । वारमुख्याप्रशस्त्यै वारमुख्या या विशिष्टा वेश्याः, नृत्यगीतादिषु प्रसिद्धा वारस्त्रिय इत्यर्थः, न तु तनुविक्रेतृरूपाजीवा इतिभावः । 'वारस्त्री गणिका वेश्या रूपाजीवा-ऽथ सा जनैः' सत्कृता वारमुख्या स्यात्' इत्यमरः । तासां प्रशस्तिः प्रशंसा तस्यै हरिवदनं 'हरिवदनम्' इति पदम् । पत्न्या हरिवदनोपनाम्न्याः स्वभार्यायाः। स्मृतेः स्मरणादेव । अयौक्षीत् प्रयुक्तवान् । 'युजिर्' योगे धातोर्लुङ्' इत्थमे-तादृग्भावनं विचारधारणम् । प्रणयिनि प्रेमासक्ते पुरुषे । भवति विद्यते । अत्राऽस्मिन् विषये । न चित्रमाश्चर्यं नास्ति । वाऽथवा हरिवदनं हरेर्विष्णोर्वदनं मुखम् । त्रिलोक्याः स्वर्गमर्त्यपाताललोकत्रय्याः । 'द्विगोः' इति ङीप् । अनाख्यं न विद्यत आख्या नाम यस्य तत् ! 'आख्याह्वे अभिधानं च नामधेयं च नाम च' इत्यमरः । भूषणं मण्डनमस्ति । तदर्थमेव स तत्पदं प्रयुक्तवानिति ज्ञेयम् । अत्र सामान्यार्थेन विशेषार्थ समर्थन रूपोऽर्थान्तर न्यासोऽलङ्कारः । हरिवदनमित्यत्रश्लेषश्च मालिनीवृत्तम् । तल्लक्षणं यथा वृत्तरत्नाकरे-ननमयययुतेयं मालिनी भोगिलोकैः' इति ।।५७।।

रघुपतिपददासोऽपि स्वरामायणस्य
प्रतिभजनमकार्षीदात्मनामाङ्केनेन ।
हरिवदनविधाने लोलुपो गीतिकारः
प्रतिरचनमनेनाऽभूषयत् किं नु चित्रम् ।।५८।।

– इति पूर्वार्द्धम् –

रामभक्त तुलसीदासले पनि आफूले बनाएको रामायणको प्रत्येक भजन आफ्नो नामले अङ्कित गरेका छन् भने, हरि वदन पद मन पराउने यी गीतिकारले

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आफ्नो प्रत्येक रचनालाई यो (हरिवदन) पदले भूषित गरेकोमा के आश्चर्य !

रध्विति । रघुपतिपददासो रामचरणभक्तस्तुलसीदास इत्यर्थः । अप्यव्ययेनाऽन्येषां साधारणजनानां का वार्तेति व्यज्यते । स्वरामायणस्याऽऽत्मनिर्मितरामायणस्य । प्रतिभजनं प्रत्येकभजनम् । भजनं भजनं प्रति प्रतिभजनम् । आत्मनामाङ्कनेनाऽऽत्मनाम्नः स्वनामाक्षरस्य यदङ्कनं चिह्नीकरणं तेन । अकार्षीद् व्यधात् । हरिवदनविधाने हरिवदनशब्दविन्यासे लोलुपो लुब्धो गीतिकारो गीतिरचयिता मोतिराम इत्यर्थः ।

प्रति रचनं रचनां रचनां प्रति प्रतिरचनं प्रत्येकात्मकृतिम् । अनेन हरिवदन विधानेन । अभूषयदमण्डयत् । किं चित्रमाश्चर्यं नु तर्के ।।५८।।

इति भरतराजशर्मघिमिरेमन्थलीयकृतौ मोतिरामवृत्ते खण्डकाव्य पदार्थान्वयबोधिन्यां टीकायां पूर्वार्द्धम् ।



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मोतिवृत्तम्

उत्तरार्द्धम्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मोतिवृत्तम्

उत्तरार्द्धम्

संवाहितोरुर्नववाणिनीभिः
सार्धं शयानश्च विलासिनीभिः ।
नामानि रामस्य लिखंश्च कश्चित्
पितृव्यहाऽमात्यपदे तदाऽऽसीत् ।।१।।

मोतीराम राजधानीमा आएका बखत, भोग विलास गर्न विघ्नै सिपालु, मस्त बैंशालु नानीहरूसँग सुतेर मदमत्त नर्तकीहरूलाई खुट्टा मिचाइ-मिचाई रामनाम लेख्ने कुनै व्यक्ति आफ्नो काकालाई मारेर मन्त्री 'प्रधानमन्त्री' भएको थियो ।

संवाहितोरुरिति । नववाणिनीभिर्नवा नूतनाश्च ता वाणिन्यो मदमत्ता नर्तक्यस्ताभिस्तथोक्ताभिः । 'वाणिन्यौ नर्तकीदूत्यौ' इत्यमरः । वाणिनीशब्दस्य प्रयोगो यथा महाकाव्ये रघुवंशे (६/७६) 'यस्मिन् महीं शासति वाणिनीनां निद्रां विहारार्धपथे गतानाम् । वातोऽपि नाऽस्रंसयदंशुकानि । कोलम्बयेदाहरणाय वस्त्रम् ।' ति । संवाहितौ कृतमर्दनावूरु सक्थिनी यस्य स तथोक्तः । विलासिनीभिर्निधुवनकेलिकुशलाङ्गनाभिः । सार्धं सह । 'सहयुक्तेऽप्रधाने' इति सहार्थे तृतीया । शयानश्च शयने लम्बायमानश्च । रामस्य भगवतो रामचन्द्रस्य । नामानि नामधेयानि नामसहस्रमित्यर्थः । लिखंश्चाऽक्षरविन्यासं कुर्वंश्च ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कश्चित्कश्चन । पितृव्यहा पितृभ्रातृहन्ता । वीर समशेराभिधानो राणाकुलोत्पन्न पुरुषः स्वपितृव्यं प्रधानमन्त्रिणं रणोद्दीपं व्यापाद्य तत्पदेस्थित इतीतिहासज्ञाः। तदा तस्मिन् काले, यदा मोतिरामो राजधानी माययौ । अमात्यपदे मन्त्रिपदे प्रधानमन्त्रिपद इत्याशयः । 'अमात्यो राज्याङ्गेष्वेकमङ्गं यथाऽमरः- 'स्वाम्य-मात्यसुहृत्कोषराष्ट्रदुर्गबलानि च राज्याङ्गानि प्रकृतयः । 'मन्त्री धीसचिवोऽमात्यः' इति चामरः । आसीत्।।१।।

प्रजाः प्रजाः स्वा इव चिन्तयन्तं
राजानमाजीवनमर्थवर्जम् ।
कृत्वा च हृत्वा जनलेखवाणी-
स्वातन्त्र्यमेष प्रशशास देशम् ।।२।।

यस मन्त्रीले प्रजालाई आफ्नै छोराछोरीजस्तो सम्झने राजालाई जनमभर प्रयोजनविहीन वा राजा शब्दको अर्थबाट हीन बनाएर तथा जनताको लेख स्वतन्त्रता र वाक्स्वतन्त्रताको अपहरण गरेर देशमा प्रशासन गऱ्यो ।

प्रजा इति । प्रजाः प्रकृतीः । स्वा आत्मीया प्रजाः सन्ततीरिव 'प्रजा स्यात् सन्ततौ जने' इत्यमरः । चिन्तयन्तं विचारयन्तम् । राजानं नृपालम् 'आजीवनं जीवनपर्यन्तम्' अर्थवर्जं प्रयोजनविहीनं सर्वाधिकारग्रहणात् वा धनहीनं राष्ट्रसम्पत्तेरधिकाराभावात् वा राजशब्दार्थहीनम् 'राजा प्रजारञ्जनात्' प्रजा रञ्जयितुमवसरप्राप्त्यभावात् । इत्युक्त्यनुसारं कृत्वा जनलेखवाणी स्वातन्त्र्यं च स्वतन्त्रस्य भावः स्वातन्त्र्यम् 'गुणवचन ब्राह्मणादिभ्यः कर्मणि च' इति ष्यञ् । जनानां लेखवाण्योः स्वातन्त्र्यं तत्तथोक्तम् । जनताया लेखनभाषण स्वतन्त्रतामपि । हृत्वाऽपहृत्य । देशं राज्यम् । प्रशशास प्रकृष्टेन शशास । अत्र जकारशकारयोर्बाहुल्येन वृत्यनुप्राोऽलङ्कारः ।।२।।

न विस्फुटा क्वापि विकासकान्ति -
र्न प्रस्फुटा च प्रतिभा प्रजायाः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गतं यथा व्यञ्जनमालवण्यं
प्रशासने तस्य बभूव राज्यम् ।।३।।

कुनै विकासको शोभा खुलेन, न त जनताको बुद्धि नै फुर्न पायो । राज्य त्यसको प्रशासनमा अलिनो तिहुन जस्तो भयो ।

नेति । क्वाऽपि कुत्रचिदपि । विकास कान्तिर्विकाशरश्मिः । 'छाया सूर्यप्रभा कान्तिः' इत्यमरः । न विस्फुटा स्फुटा नाऽभूत्, राज्ये निर्माण कार्याभावात् । प्रजाया जनस्य जातावेक वचनं प्रजानामित्यर्थः । प्रतिभा प्रज्ञा। न प्रस्फुटा न विस्फुटा विद्यालयवाचनालयादीनां स्थापनाभावात् । राज्यं राष्ट्रम् । तस्य मन्त्रिणः । प्रशासने शिष्टौ । आलवण्यमलवणस्य भाव आलवण्यं लवणराहित्यं तत् । 'गुणवचन ब्राह्मणादिभ्यः कर्मणि च' इति ष्यञ् । गतं प्राप्तं लवणहीनमिति भावः । व्यञ्जनं शाकादिव्यञ्जनविशेषो यथेव । बभूव । अत्राविस्फुटविकासरेखायराज्यायाऽलवण व्यञ्जनस्योदाहरण-दानाद् दृष्टान्तालङ्कारः ।।३३।।

निर्माणकार्याणि लघूनि यानि
तेनेह राष्ट्रस्य धनैः कृतानि ।
मया कृतानीति विसूचनाय
तान्यात्मनाम्ना समलङ्कृतानि ।।४।।

राष्ट्रको धनले केही सानातिना निर्माणका जुन काम भए, तिनमा 'मैले गरेको हो' भन्ने जनाउन उनले आफ्नो नाम अङ्कित गरे ।

निर्माणेति । इह राज्ये । राज्यस्य धनैरर्थैर्लघून्वगुरूणि यानि निर्माण कार्याणि रचनकर्माणि तेनाऽमात्येन कृतानि विहितानि विशेषण सूचनं विसूचनं तस्यै । विज्ञापनाय तानि कार्याणि मया कृतानि मया विहितानीति विसूचनाय। 'तादर्थ्ये चतुर्थी वाच्यम्' इति चतुर्थी । आत्मनाम्ना स्वनामधेयेन समलङ्कृतानि विभूषितानि । वीरधारावीरपुस्तकालयइत्यादीनि कृतानीत्यर्थः ।।४।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वाम्येऽपि सर्वाधिकृतीर्नृपस्य
श्रिता ह्यमात्यस्य भुजे निरीक्ष्य ।
दया दयारामसुतस्य चित्ते
तदोदियाय क्षितिपालकत्वे ।।५।।

त्यसको प्रशासन कालमा, स्वामित्व हुँदा हुँदै पनि राजाको सबै अधिकार मन्त्रीको हातमा बसेको देखेर राजत्व उपर नै दयारामका छोरा मोतीरामको चित्तमा दया उदायो ।

स्वाम्य इति । तदा तस्मिन् समये । तस्य प्रशासनकाल इत्यर्थः । स्वाम्येऽपि स्वामिनो भावः स्वाम्यं 'गुणवचनब्राह्मणादिभ्यः कर्मणि च' इति ष्यञ् । तस्मिन् । प्रभुत्वे सत्यपि । नृपस्य राज्ञः । सर्वाधिकृतीः सम्पूर्णाधिकारान्। अमात्यस्य मन्त्रिणः । भुजे करे । श्रिताः स्थिता राजाधिकारान् मन्त्रिणा-हृतानित्यर्थः । निरीक्ष्य विलोक्य । दयारामसुतस्य दयारामात्मजस्य चित्ते स्वान्ते क्षितिपालकत्वे । क्षितेः पालकः क्षितिपालकस्तस्यभावस्तत्त्वं तस्मिन् तथोक्ते । पृथ्वीरक्षकत्वे राजत्व इत्यर्थः । राजतन्त्र इति यावत् । दया करुणा, उदियायोत्थिताऽभूत् । उदुपसर्गपूर्वकात् 'इण् गतौ धातोर्लिट् । दयारामात्मजे दयोदयो नैसर्गिको गुण इति ज्ञेयः । हीति निश्चयार्थेऽव्ययम्।।५।।

स तादृशीं देशदशामपश्यत्
जाता तदुत्सादनजागराऽपि ।
नालोकयद् दीर्घविदेशवासं
विना तदर्थं परमभ्युपायम् ।।६।।

तिनले देशको त्यस्तो अवस्था देखे, त्यसलाई हटाउने जाँगर पनि उदायो, तर त्यसका लागि लामो समयसम्म विदेशमा बस्नुपर्ने बाहेक अर्को उपाय देखेनन् ।

स इति । स मोतिरामः । तादृशीं तादृग्रूपाम् 'पूर्वश्लोकैः कथितामित्यर्थः,

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

देशदशां जनपदावस्थाम् । अपश्यद् व्यलोकयत् । तदुत्सादनजागरा तस्या दुरवस्थाया उत्सादने विनाशने जागरा जागर्या, तथोक्ता 'अपि जागर्या जागरा द्वयोः' इत्यमरः, जातोत्थिता देशस्य दुरवस्थां विलोक्य तन्निवारयितुं तस्येच्छा-ऽभूदितिभावः, परं किन्तु 'तदर्थमुत्सादनार्थम् । दीर्घविदेशवासं विना दीर्घश्चासौ विदेशवासो दीर्घविदेशवासस्तं चिरकालविदेशप्रवासनं विना अभ्युपायं युक्तिं नालोकयत् नापश्यत् ।।६।।

स वाग्वतीवारितटे कदाचित्
स्त्रीपुंसलापानशृणोल्लयाप्तान् ।
एतानवृत्तान् बहुवृत्तबद्धान्
कृत्वैहत श्रावयितुं च लोकान् ।।७।।

कुनै दिन तिनले वाग्मतीको किनारामा आइमाई र लोग्नेमान्छेले लोली हालिहाली गरेको कुरा सुने र छन्दमा नगूँथिएको त्यो वार्तालाप छन्दोबद्ध कविता मिलाएर कविलेखकहरूलाई सुनाउन पनि इच्छा गरे ।

स इति । स मोतिरामः । कदाचिज्ज्ञातु वाग्वतीवारितटे वाग्वतीनदी सलिलतीरे सजलाया वाग्वत्यास्तीर इत्यर्थः । लयाप्तान् सङ्गीतात्मकलय मनुगतान् । लयशब्दस्य प्रयोगो यथा मालविकाग्निमित्रे (२/९)- 'पादन्यासो लयमनुगतः' इति । स्त्रीपुंसलापान् स्त्री च पुमांश्च स्त्री पुंसौ तयोर्लापा वार्ता स्ता स्तथोक्तान् । स्त्रीपुंसावित्यत्र 'अचतुर विचतुर सुचतुर स्त्रीपुंस' 'इत्यादिना निपातनात् अच्' अशृणोदाकर्णयत् । अवृत्ताञ्छन्दो रहितानेतानिमान् लापान्। बहुवृत्तबद्धाननेकच्छन्दोग्रथितान् पद्यमयग्रन्थानित्यर्थः । 'वृत्तं' पद्ये चरित्रे' इत्यमरः। कृत्वा विधाय 'लोकान् जनान् श्रावयितुं श्रावणेन ज्ञापयितुं चैहतैच्छत्।।७।।

ततस्तदीयं हृदयं बभूव
स्ववाङ्मयोच्चारित काव्यशौण्डम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यस्मिन् रसार्द्रीकृत बीजभावं
ललाञ्छ संपल्लवितुं कवित्वम् ।।८।।

त्यसपछि तिनको हृदय आफ्नो भाषामा उच्चारित काव्यरूपी मदिराको पानले मस्त भयो, जसमा रसले भिजेका बीउजस्ता भाव हुने कविताले राम्ररी पल्लवित हुनलाई लक्षण देखायो ।

तत इति । ततस्तदनन्तरं स्त्रीपुंसवार्ताश्रवणादनन्तरमित्यर्थः । तदीयं तस्येदं तदीयम् । तत्सम्बन्धि ! त्यदादीनि च । इति वृद्धत्वे' इति छप्रत्ययः। हृदयं हृद् । स्ववाङ्मयोच्चारितकाव्यशौण्डं स्वस्याऽऽत्मनो वाङ्मयी सरस्वती भाषेत्यर्थः, तस्यामुच्चारितानि यानि काव्यानि कविकृतयस्तेषु शौण्डं मत्तम्' शुण्डायां सुरायामभिरतं शौण्डमण् प्रत्ययः । 'मत्ते शौण्डोत्कटक्षीवा' इत्यमरः। यथावेणी संहारे (५/२१) 'अतिकृतिनिपुणं ते चेष्टितं मानशौण्ड' इति बभूव भूतम् । 'यस्मिन् हृदि रसार्द्रीकृतबीजभावं रसैर्जलैर्वाशृङ्गारादिरसैराद्री–कृतानि शीतीकृतानि संपृक्तानि वा यानि बीजानि वपनीयकणा वा हेतव स्तानीव वा तेषां भावा रत्यादिरूपमनोविकाराः वाऽस्तित्वानि 'विकारो मानसो भावः' इत्यमरः, यस्मिंस्तत् । कवित्वं कविता कवेर्भावस्तत्त्वमिति कवित्वम् । संपल्लवितुं संस्फुटितुम् । ललाञ्छ लक्षणमदर्शयत् । लाछि लक्षणे धातोर्लिट्। अत्रलुप्तोपमाश्लेषयोः संसृष्टिरलङ्कारः ।

कवेः कवित्वं पयसो रसत्वं
न कुत्रचित् संश्रयतः पृथक्त्वम् ।
रसानुसारीव जलस्वभाव
आसीत्स्वतोऽसौ कवितात्मभावः ।।९।।

कविबाट कविता र जलबाट रस काहीं पनि पृथक् रहँदैनन् । रसको पछि लाग्ने जलको स्वभावजस्तै स्वतः यिनी कविताको आत्मरूप थिए ।

कवेरिति । कवेः काव्यकारात् । कुशब्द इति धातोः 'अच इः' इति

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रत्ययात् कविर्भवति । कवित्वं कविता कवेर्भावस्तत्त्वमिति कवित्वम् । 'तस्य भावस्त्वतलौ' इति त्वल्प्रत्ययः, पयसो जलात्' रसत्वमार्द्रता । कुत्रचित् क्वाऽपि' पृथत्त्व विभिन्नरूपत्वं न संश्रयतो न वसतः । रसानुसाय्यनुसरती-त्यनुसारी ताच्छील्ये णिनिः । रसस्यानुसारी रसानुसाय्यार्द्रतानुयाय्यार्द्रतायुक्त इत्यर्थः । जलस्वभावः पयःप्रकृतिर्यथा । असौ मोतिरामः स्वतः स्वयमेव, कवितात्मभावः कविताया: कवित्वस्याऽऽत्मभावः स्वरूपंतथोक्तः । आसीत्। अत्र पूर्वार्द्धेऽर्थान्तरन्यास उत्तरार्धेचोपमा ।।९।।

सख्युर्विवाहाहनि तारतारं
वधूवराभीष्टजनैः समुक्तम् ।
रामायणं भानुकृतं स कण्ठ्यं
निशम्य लब्धुं तदियाय लौल्यम् ।।१०।।

साथीको विवाहको दिनमा वधू र वर पक्षका मानिसले टङ्कारो स्वरमा मुखाग्र भनेको भानुभक्तले बनाएको रामायण सुनेर त्यही भेट्टाउन उनी निकै लालायित भए ।

सख्युरिति । स मोतिरामः, सख्युर्मित्रस्य सहसमानः ख्यायते लोकैरिति सखा । षष्ट्यैकवचने 'अथमित्रं सखा सुहृत्' इत्यमरः । सख्युर्लक्षणं यथा- 'अत्याग सहनो बन्धुः सदैवानुमतः सुहृत् एकक्रियं भवेन्मित्रं समप्राणः सखा स्मृतः' इति । विवाहाहनि विशेषेण वहनं विवाहः परिणयो ब्राह्मोपयम इत्याशयः। व्युपसर्गपूर्वकाद् वहधातोर्घञ् । 'विवाहोपयमौ समौ' इत्यमरः, विवाहस्याष्टधा भेदा यथा- 'ब्राह्मोदैवस्तथैवार्षः प्राजापत्यस्तथासुरः । गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः ।' इति मनुः । तस्याऽहनि दिवसे । वधूवराभीष्टजनैर्वधूश्च वरश्चवधूवरौ तयोरभीष्टा अभिमता ये जनाः पुरुषास्तैस्तथोक्तैः । तारतारमुच्चस्वरं यथा तथा समुक्तं सम्यक् कथितं पठितमित्यर्थः । भानुकृतं भानुभक्ताचार्य-निर्मितम् 'नामैकदेशे नामग्रहणम्' इत्युक्तेः। कण्ठ्यं कण्ठे भवं कण्ठ्यं कण्ठस्थं तत् । मुखाग्रीकृतमित्यर्थः। रामायणं रामकाव्यम् निशम्य श्रुत्वा तद्रामायणं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लब्धुं प्राप्तुम् । लौल्यं लोलस्य भावो लौल्यं तत् । चाञ्चल्यम् । 'गुणवचन ब्राह्मणादिभ्यः कर्मणि च' इति ष्यञ् । इयाय जगाम । इण्गतौधातोर्लिट् । अस्थिरोऽभूदित्यर्थः । तत्प्राप्तये उत्कण्ठातिशयोऽभूदिति भावः ।।१०।।

अथाङ्ग्लविद्याध्ययनं स्वभाषा-
संवर्द्धनस्यैव कृते भवेन्मे ।
इति प्रतिज्ञाय ययौ विदेशं
समुह्य देहीव स देशदेहम् ।।११।।

भानुभक्त आचार्यका कविताहरू सुनेपछि, 'मेरो अंग्रेजी पढाइ मेरै भाषाको उन्नतिका लागि हुनेछ' भन्ने प्रतिज्ञा गरेर, भौतिक शरीर लिएको जीवझैं, नेपालको शरीर लिएका उनी मुगलान पसे ।

अथेति । भानुभक्तकविताश्रवणानन्तरम् । स मोतिरामः । मे मम । आङ्गलविद्याध्ययनम्–आङ्गलभाषापठनम् । स्वभाषासंवर्द्धनस्य कृते नैपालि-कीभाषा संवृद्धिहेतव एवभवेत् । इतीत्थम्, प्रतिज्ञाय प्रतिज्ञां कृत्वा, देही देहोऽस्यास्तीति देही शरीरी जीव इत्यर्थः । इव यथा देश देहं देशस्य नेपाल देशस्य । देहः शरीरं तम् । समुह्य संधार्य, विदेशं देशान्तरं भारतमित्यर्थः। ययौ जगाम । अत्रोपमालङ्कारः ।।११।।

निरागसस्तस्य निवासभूमिं
जहार कश्चित् सचिवाधमः किम् ।
मातुः प्रकृत्या निहताश्रयं तं
ध्रुवं ततोऽन्यक्षितिराजुहाव ।।१२।।

कुनै अधम मन्त्रीले निरपराध तिनको घरघडेरी जफत गरेको पो हो कि? त्यसैले घरद्वार विहीन तिनलाई अर्काकी पृथ्वीले आमाको स्वभाव हुँदा बोलाइन् कि ?

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

निरागस इति । कश्चित् कश्चन । सचिवाधमः सचिवेषु मन्त्रिष्वधमो निकृष्टः । राणा मन्त्रीत्यर्थः । निरागसो निरपराधस्य । 'आगोऽपराधो मन्तुश्च' इत्यमरः। तस्य मोतिरामस्य निवासभूमिं वासस्थलम् । जहार हृतवान् किमिति- शङ्कायाम् । ततस्तस्माद्धेतोः । निहताश्रमं नितरां हतो निहत एतादृश आश्रमो यस्य तम् । आश्रमरहितं गृहभूमिहीनमित्यर्थः । तं युवकम् । अन्यक्षितिरन्येषां क्षिति : पृथ्वी । भारतभूमिरित्यर्थः । मातुर्जनन्याः प्रकृत्याः स्वभावाद्धेतोः । आजुहाव निमन्त्रयामास ध्रुवमित्युत्प्रेक्षायाम् ।

स्मृत्वा हरिश्चन्द्रमहोदयस्य
निजेऽनुजप्रेम विदेशितः सः ।
काशीमितश्चाप सबालबालां
प्रकाशशालामिव पाठशालाम् ।।१३।।

परदेश लागेका तिनी आफूमा हरिश्चन्द्र महोदयले गरेको भ्रातृप्रेम सम्झेर काशी पुगे । त्यहाँ तिनले छात्रछात्रा प्रशस्त भएको विद्यामन्दिर पनि भेटे, जुन उनलाई प्रकाश दिने घरैजस्तो लाग्यो अर्थात् त्यसमा अंग्रेजी पढ्न थाले ।

स्मृत्वेति । विदेशितो विदेशशब्दादितच् । परदेशमितः स मोतिरामः, निज आत्मनि । हरिश्चन्द्रमहोदयस्य हरिश्चन्द्रस्तदाख्यः पुरुषो भारतीयै र्भारतेन्दु रिति कथित इतीतिहासाज्ज्ञेयम् । स एव महोदयो महानुभावस्तस्य । अनुजप्रेम भ्रातृवात्सल्यम्। स्मृत्वा स्मरणं कृत्वा। काशीं वारणासीमितः प्राप्तः । सबाल- बालां बालाश्च बालकाश्च बालाश्च बालिकाश्चेति बालबालास्ताभिः सहिता ताम्। छात्रछात्राभरिताम् । पाठशालां विद्यामन्दिरम्, प्रकाशशालां ज्योतिःप्रदायिगृह- मिव। आप लेभे तत्राआङ्ग्लविद्यामपठदितिभावः, अत्रोत्प्रेक्षालङ्कारः ।।१३।।

न केवलं स प्रपपाठ विद्या -
स्ततार वा नैकविधाः परीक्षाः ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कृत्वाऽप्यभीः संघटनं कवीनां
चकार चारूच्चयनं कृतीनाम् ।।१४।।

ती मोतीरामले विद्याध्ययन वा अनेक परीक्षा मात्र पार गरेनन्, निर्भीक भएर कविहरूको संगठन गर्दै नेपाली रचनाहरूको राम्रो सङ्कलन पनि गरे ।

नेति । स मोतिरामः केवलं यथा तथा विद्याः । प्रपपाठ प्राध्ययनं चकार वा नैकविधा बहुविधाः परीक्षाः परीक्षणानि ततार पपार । नेति मात्रं न। अभीर्निर्भीकः सन् । कवीनां पण्डितानां संघटनं संघं कृत्वा विधाय 'कृतीनां नैपालिकीरचनानां चारूच्चयनं सुन्दरसङ्कलनमपि चकार विदधे । स विद्याध्ययनेन साकं परीक्षा उत्तीर्य, कविसंघटनं कृत्वा कृतिसञ्चयमप्य करोदिति सरलार्थः ।।१४।।

पौष्पे रसे षट्पदवत् कवित्वे
रतेऽस्य षड्दर्शनदीप्तचित्ते ।
रामायणीयाः कविता हि भानो-
स्तोषं प्रभावद् ददुरुस्रदानोः ।।१५।।

फूलको रसमा छओटा खुट्टा भएको भमरा जस्तै, कविताको रसमा छओटा दर्शनले उज्यालो भएको यिनको चित्त लाग्दा, भानुभक्त आचार्यकृत रामायणका कविताहरूले नै, किरणदायी सूर्यका कान्तिले झैं, यिनलाई सन्तोष दिन्थे ।

पौष्प इति । पौष्पे पुष्पस्याऽयं पौष्पः । 'तत्र भवः' इत्यण्, तस्मिन् पौष्पे कौसुमे रसे द्रवे मकरन्द इत्यर्थः । षट्पदवत् द्विरेफ् इवेत्यर्थः । 'तेन तुल्यं क्रियाचेद्वतिः' इति वति प्रत्ययः । 'द्विरेफः पुष्पलिड्भृङ्ग षट्पदभ्रमरालयः' इत्यमरः । अस्य मोतिरामस्य' षड्दर्शनदीप्त चित्ते षड्भिः षट्संख्यकैर्दर्शनैः शास्त्रैः सांख्य-योग-न्यायवैशेषिक-मीमांसा-वेदान्तशास्त्रैरित्यर्थः । दीप्तं द्योतितं तच्च-तच्चित्तं चेत स्तस्मिन् । कवित्वे कवितायां कवितारस इत्यर्थः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कवेर्भावः कवित्वं तस्मिन्, 'तस्य भावस्त्वतलौ' इति त्वल्' रते संलग्ने सति 'यस्य च भावेन भावलक्षणम्' इति सप्तमी । षट्पदो भ्रमरः पुष्पद्रव इव तस्य षड्दर्शनवच्चित्तं कवित्वरसे रतमितिभावः । भानोर्भानुभक्तस्य रामायणीया रामायणे भवा रामायणीयाः' 'वृद्धाच्छः' इति छप्रत्ययः । छस्येयश्च । कविताः पद्यानि । ह्येव । उस्रदानोरुस्राणां किरणानां दानुर्दाता तस्य । दानौ भानौ च 'दाभाभ्याम्' इति नुः । 'किरणोस्र मयूखांशु गभस्ति घृणिधृष्णयः' इत्यमरः। प्रभावत् कान्तय इव । तोषं सन्तोषं ददुरयच्छत्न् तस्मा इति शेषः । अत्र भ्रमरस्य षट्पदत्वेन चित्तस्य षड्दर्शनयुक्तत्वेन, पुष्पद्रवपानेन कवित्वरसाधानेन च साम्यात्, तथैव भानोः कवितानां सूर्यप्रभाणां च तोषकर्मणि साम्या दुपमालङ्कारौ ।

अवाप सारल्यमरन्दनव्ये
मुदं स रामायणकाव्यपद्मे ।
समार्दवानीव सुमे दलानि
पदानि तद्दाननिदानकानि ।।१६।।

सरलतारूपी पुष्परसले नौलो, भानुको रामायण काव्यरूपी कमलमा तिनी आनन्द लिन्थे, त्यो आनन्द दिने मूल कारण कमलमा भएका कलिला पात जस्ता पदहरू हुन् ।

अवापेति स मोतिरामः । सारल्य मरन्दनव्ये सरलस्य भावः सारल्यम् सरलता ।। 'गुणवचनब्राह्मणादिभ्यः कर्मणिच' इति ष्यञ् । तदेव मरन्दो मकरन्दस्तेन नव्यं नूतनं तस्मिन् । रामायणकाव्यपद्मे रामायणं तन्नाम यत्काव्यं कविकृति स्तदेव पद्मं कमलं तस्मिन् । मुदमानन्दमवापलेभे । तद्दाननिदानकानि निदानान्येव निदानकानि स्वार्थेकन्, तस्या मुदोदानस्य वितरणस्य निदानकानि मूलकारणानि तथोक्तानि । 'निदानमादिकारणम्' इत्यमरः । सुमे पुष्पे पद्म इत्याशयः । समार्दवानि मृद इदं मार्दवं तेन सहितानि समार्दवानि ससौकुमार्याणि, दलानि पलाशानि । 'पत्रं पलाशं छदनं दलं पर्णं छदः पुमान्' इत्यमरः । इव

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यथा । पदानि शब्दाः आसन्नितिशेषः। पूर्वार्धेरूपक मुत्तरार्ध उपमा ।

केनाप्युपायेन ततो ह्यखण्डं
रामायणस्याऽऽप स बालकाण्डम् ।
प्रकाशनायाऽधिगतस्य तस्य
शेषोपलब्ध्यै च यतीव येते ।।१७।।

त्यसपछि तिनले कुनै उपायद्वारा रामायणको सम्पूर्ण बालकाण्ड प्राप्त गरे। त्यो प्राप्त बालकाण्ड छपाउन र शेष (बाँकी अरू काण्ड अथवा स्वयं परमात्मालाई) प्राप्त गर्न योगी जस्तै प्रयत्नशील भए ।

केनेति । ततस्तदनन्तरम् । स मोतिरामः । रामायणस्य भानुभक्त-कृतरामायणस्य । अखण्डं 'समग्रम्, बालकण्डं तनामकाण्डम् । केनाऽपि उपायेन साधनेन । आप प्राप्तवान् । अधिगतस्य प्राप्तस्य । तस्य बालकाण्डस्य। प्रकाशनाय मुद्रणाय तादर्थ्ये चतुर्थी' शेषोपलब्ध्यै शेषाणां प्राप्तुमवशिष्टानाम-योध्यारण्यादिकाण्डानाम् । यति पक्षे शेषस्य प्रलयान्तेत्राऽपि सत्तारूपेणस्थितस्य परमात्मन इत्यर्थः । उपलब्ध्यै प्राप्त्यै । अत्राऽप्ति तादर्थ्ये चतुर्थी । यती योगी । इव यथा । 'ये निर्जितेन्द्रियग्रामा यतिनो यतयश्च ते' इत्यमरः । येते प्रयत्नं चकार । यती प्रयत्ने धातोरात्मने पदिलिट् । अत्र शेषशब्दे श्लेषाद् यतिन उपमानत्वाच्च श्लिष्टोपमाऽलङ्कारः ।।१७।।

आहूय मित्राणि विधाय गोष्ठीः
शुश्राव पद्यानि पपाठ चाऽसौ ।
नवां नवां तानि ददत्समस्यां
चाऽकारयत् सद्रचनारतानि ।।१८।।

यी साथीहरूलाई बोलाएर सभा बसालेर, कविता सुन्थे र बाँच्थे पनि। तथा पूर्ति गर्नुपर्ने नयाँ–नयाँ समस्या राखेर ती साथीहरूलाई राम्रा रचना निकाल्न व्यस्त गराउँथे ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आहूयेति। असौ मोतिरामः, मित्राणि सुहृदः । आहूय निमन्त्र्य, गोष्ठीः सभाः । विधाय कृत्वा । पद्यानि कवितास्तद्रचिता इत्याशयः । शुश्रावाऽऽकर्णयामास । पपाठ च स्वयमपि स्वरचना जगाद । नवां नवां नूतनां नूतनाम् । 'नित्य वीप्सयोः इति भृशार्थे द्विरुक्तिः, समस्यां पूर्तयेश्लोकांशम्। ददत् यच्छन् सन् । तानि मित्राणि सद्रचनारतानि सत्काव्यनिर्माणव्यग्राणि च। अकारयत् कारयामास ।।१८।।

प्रकाशनायाऽऽदिकृतेश्च भानोः
प्रेम्णोदितस्तस्य सखाऽथ कश्चित् ।
क्रीत्वा नवं मुद्रणयन्त्रमारात्
सञ्चालकत्वेन नियुक्तवांस्तम् ।।१९।।

यसपछि श्रीभानुभक्त आचार्यको पहिलो कृति रामायणको प्रकाशनको उपायका लागि तिनले कुनै साथीलाई प्रेमपूर्वक भने र साथीले नजिकैबाट नयाँ प्रेस किनेर ल्याई तिनलाई सञ्चालक पदमा भर्ना गरे ।

प्रकाशनायेति । अथ कविसंघटनाद्यनन्तरम् । भानोर्भानुभक्तस्य, आदिकृतेः प्रथमकृते रामायणस्येत्यर्थः । प्रकाशनाय च मुद्रणार्थं च, प्रेम्णा सानुरागम् । उदितो निवेदितस्तस्य मोतिरामस्य । कश्चित्कश्चन सखा मित्रम्। 'अथ मित्रं सखा सुहृत्' इत्यमरः । 'अत्यागसहनो बन्धुः सदैवानुमतः सुहृत्। एकक्रियं भवेन्मित्रं समप्राणः सखा स्मृतः ।' इति सखिलक्षणम् । आरात् समीपे । 'आराद्दूरसमीपयोः' इत्यमरः । नवं नूतनम् । मुद्रणयन्त्रं मुद्रणार्थं यन्त्रं मुद्रणयन्त्रं यन्त्रविशेषम् । क्रीत्वा क्रयं कृत्वा तं मोतिरामम् । सञ्चालकत्वेन यन्त्रसञ्चालनाधिकारित्वेन । नियुक्तवानयुङ्क्त ।।१९।।

अथ द्रुतं यन्त्र बलादखण्डं
सोऽमुद्रयद् भानवबालकाण्डम् ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लेभे सुतप्राप्तिसुखं च तेन
नवाकृतिः किं मनसो मुदे न ।।२०।।

प्रेसको सञ्चालक भएपछि, तिनले भानुभक्तको सम्पूर्ण बालकाण्ड छिट्टै प्रेसबाट छपाए र त्यसले पुत्रजन्मको सुख पाए । नयाँ आकार वा नयाँ कृति किन आनन्ददायी हुँदैनथ्यो र !

अथेति । अथ यन्त्रसंचालकपदप्राप्त्यनन्तरम् । स मोतिरामः अखण्डं समग्रम् । भानवबालकाण्डं भानोरिदं भानवं तच्चतद् बालकाण्डं भानव बालकाण्डं भानुभक्त विरचित रामायणबालकाण्डम् । यन्त्रबलाद् यन्त्र-सामर्थ्यात्। द्रुतम् त्वरितं यथा तथा । 'अथ शीघ्रं त्वरितं लघु क्षिप्रमरं इत्यमरः। अमुद्रयदप्रकाशयत् । तेन मुद्रणेन, सुतप्राप्तिसुखं च सुतस्य प्राप्तौ यत्सुखं तत् । पुत्रजन्मानन्दं च । लेभे प्राप, नवाकृतिर्नवा चासा वाकृतिर्नूतनरूपं वा नवा नूतना कृती रचना, मुदे हर्षाय किं न किमु न भवेत् भवेदेव । अत्र दृष्टान्तालङ्कारोऽर्थान्तरन्यासश्च । नवाकृतिरित्यत्रश्ले-षोऽपि।।२०।।

क्रमात् स सर्वं जनबोधनाय
रामायणं मुद्रणमानिनाय ।
स्वदेशसर्वस्वमभूतपूर्वं
भानोश्च वर्चस्वमदृश्यतेदम् ।।२१।।

दुनियाँले जानून् भनेर यिनले क्रमशः सम्पूर्ण नै रामायण छपाए । यो प्रकाशित रामायण आफ्नो देश नेपालको अभूतपूर्व सर्वस्व र भानुभक्तको तेजोरूप धन नै देखियो ।

क्रमादिति । स मोतिरामः, जनबोधनाय जनानां लोकानां बोधनं ज्ञानदानं तस्मै, तादर्थ्ये चतुर्थी, रामायणं भानुभक्तीयरामायणम् । क्रमात् क्रमशः, मुद्रणं मुद्रीकरणम् । आनिनायाऽऽनयामास, अमुद्रयदित्यर्थः, 'दुह्याच्-पच्दण्ड-रुधिप्रच्छिचिब्रूशासुजिमथ्मुषांकर्मयुक्स्यादकथितं तथास्यान्त्रि-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हृकृष्वहाम्' इति द्वितीया । इदं मुद्रितं रामायणम्, अभूतपूर्वं पूर्वं भूतं भूतपूर्वं न भूतपूर्वमभूरूतपूर्वम् । अविद्य मानपूर्वम् दुर्लभमित्यर्थः 'भूतपूर्वे चरट्' इति निर्देशाद्भूतशब्दस्य पूर्व निपातः। स्वदेशसर्वस्वं स्वदेशस्य नेपालराष्ट्रस्य सर्वस्वं सम्पूर्णधनम् । भानोर्भानुभक्तस्य। वर्चस्वं वर्चस्तेज एव स्वं धनम् । भानुभक्तकृतं रामायणं तेन निहितं स्वतेज एवेत्यर्थः । 'तेजः पुरीषयोवर्चः' इत्यमरः, एवमाह पद्मपुराणे श्रीमद्भागवतं प्रत्युद्धवः 'स्वकीयं यद्भवेत्तेजस्तच्च भागवतेऽदधात्, तिरोधाय प्रविष्टोऽयं श्रीमद्भागवतार्णवम् ।' इति । अदृश्यत प्रतीतमभवत् । अत्र मुद्रणकार्ये जनबोधनार्थस्य हेतुत्वात् काव्य-लिङ्गालङ्कारः ।।२१।।

साहित्यराहित्यतमस्यकस्माद्
भानूदयोऽभूत् किल तत्प्रयत्नात् ।
तस्माद्धि रामोऽपि स रामरम्ये
काव्येऽभवद् राम इवाऽभिरामः ।।२२।।

साहित्यको अभावरूपी अन्धकारमा तिनको प्रयत्नबाट अकस्मात् भानु (सूर्य) को उदय भयो र त्यसै कारणले रामायणमा राम झैं यस खण्डकाव्यमा मोतीराम पनि रमाइला भए ।

साहित्येति । साहित्यराहित्यतमसि हितेन धर्मार्थकाममोक्षफलासादन-मयहितेन सहितौ शब्दार्थाविति सहितौ, तयोर्भावः कर्म वा साहित्यम् । 'गुणवचन ब्राह्मणादिभ्यः कर्मणि च' इति ष्यञ् । रहितस्य भावः कर्म वेति राहित्यमत्रापि ष्यञ् । साहित्यस्य काव्यस्य यद् राहित्यं शौन्यं तदेव यत्तमोऽन्ध-कारस्तस्मिन् । साधुकाव्यनिषेवणफलानि यथा साहित्यदर्पणे- चतुर्वर्ग-फलप्राप्तिः सुखादल्पधियामपि' काव्यादेव......' इत्यादि कृत्याकृत्य प्रवृत्ति-निवृत्युपदेशद्वारेण सुप्रतीतैव' इति । तत्प्रयत्नात् तस्य मोतिरामस्य यः प्रयत्नो मुद्रणकर्म तस्मात्' हेतौ पञ्चमी । अकस्मात् सहसा भानूदयो भानोर्भानुभक्त-स्योदयः प्राकट्यमभूत् तमसि सूर्योदय इत्यपि ध्वन्यते किलेति निश्चयत्व

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बोधनायाव्ययम् । स पूर्वोक्तः रामोऽपि मोतिरामोऽपि । 'नामैकदेशे नाम ग्रहणम्' इत्युक्तेः । रामेण मोतिरामेण रम्ये रमणीये पठनीय इत्याशयः। काव्ये खण्डकाव्येऽस्मिन् मोतिरामवृत्ते खण्डकाव्य इति भावः । अथवा रामरम्ये रामकथामनोहरे । काव्ये रामायणकाव्ये । राम इव रामचन्द्र इव । अभिरामः सुन्दरः' अभवत् बभूव । अत्र रामशब्दे श्लेषाच्छ्लिष्टोपमालङ्कारः।।२२।।

देशे विदेशे भवने वनेऽपि
बालाश्च वृद्धाश्च वयोन्विताश्च ।
शार्दूलविक्रीडितवृत्तबद्धान्
श्लोकान् समुच्चैर्जगुरेतदीयान् ।।२३।।

देश, विदेश, घर, वन सर्वत्र बालक, बालिका, वृद्ध, वृद्धा र उमेरदाहरू शार्दूल विक्रीडित छन्दमा बनेका श्लोकहरू उच्च स्वरमा गाउन लागे ।

देश इति। देशे स्वदेशे नेपाल इत्यर्थः । विदेशे परदेशे भारत मलयादि-देशेष्वित्यर्थः । भवने गृहे, वने काननेऽपि । बालाश्च बालकाश्च बालिकाश्च । वृद्धाश्च वृद्धपुरुषाश्च वृद्धस्त्रियश्च वयोन्विताश्च वयसा तारुण्येनाऽन्विताः सहितास्तथोक्ता स्तरुणास्तरुण्यश्च । पुमान् स्त्रियाः प्रत्येकशेष समासः । शार्दूलविक्रीडितवृत्तबद्धान् शार्दूलविक्रीडितं नाम यद् वृत्तं छन्द स्तस्मिन् बद्धा ग्रथिता स्तान् । यथावृत्तरत्नाकरे तल्लक्षणम्- 'सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम्' इति । एतदीयान् भानुभक्तीयान् । श्लोकान् पद्यानि समुच्चै रुच्चस्वरं यथा तथा जगुरगायन् ।।२३।।

शैला गुहाभिः सरितः प्रवाहै -
र्वनानि वृक्षैश्च गृहा गवाक्षैः ।
विस्तारयन्ति स्म वधूजनस्य
कण्ठ्यं कलं सन्ततपाठतोऽस्य ।।२४।।

आइमाईहरू जहाँ हुँदा पनि रामायणका सिलोक हालिरहने हुनाले

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तिनीहरूको गलाको मीठो स्वर पहाडहरू गुफाद्वारा, नदीहरू प्रवाहद्वारा, वनहरू रूखद्वारा र घरहरू झ्यालद्वारा टाढासम्म फैलाइदिन्थे ।

शैला इति । अस्य रामायणस्य । सन्ततपाठतो निरन्तरपाठात् । वधूजनस्य युवतिवृन्दस्य 'कण्ठ्यं कण्ठे गले भवं कण्ठ्यम् । कलं मधुरध्वनिम् 'ध्वनौ तु मधुरास्फुटे' कलः' इत्यमरः । शैलाः पर्वता गुहाभिर्दरीभिः प्रतिध्वनिहेतोः। सरितो नद्याः प्रवाहै रुर्मिर्भिर्गुञ्जनहेतोः । वनानि काननानि वृक्षै स्तरुभिर्मरुत्स्पर्शे शब्दहेतोः । गृहा भवनानि । गृहशब्दो बहुवचनान्ते नित्यंपुल्लिङ्गः । 'गृहाः पुंसि च भूम्न्येव निकाय्य निलयालयाः' इत्यमरः । गवक्षैर्वातायनैश्छिद्रहेतोः। 'वातायनं गवाक्षः' इत्यमरः । विस्तारयन्ति स्माऽविस्तारयन् । 'अपरोक्षे च' लट् । 'तु हि च स्म ह वै पादपूरणे' इत्यमरः।।२४।।

माता पिता भ्रातृसुतादयो वा
स्वामी सखा सेवकवृन्दमाप्ताः ।
पतिः कलत्रं नृपतिः प्रजा वा
स्वं स्वं सदाचारमितो ह्यजानन् ।।२५।।

आमा, बाबु, भाइ, छोरा आदि, मालिक, साथी, नोकर, विश्वासी मानिस, पति, पत्नी, राजा र प्रजा सबले आफ्नो-आफ्नो कर्तव्य यही भानुभक्तको रामायणबाट जाने ।

मातेति । माताऽम्बा । मानपूजायां धातोस्तृच् न लोपश्च । 'अम्बा माता' इत्यमरः । मातृमहिमा यथा- 'यस्य माता गृहे नास्ति भार्या चाऽप्रियवादिनी। अरण्यं तेन गन्तव्यं यथाऽरण्यं तथा गृहम्' इति सूक्तिः । चाणक्यनीतिर्यथा- 'आदौ माता गुरोः पत्नी ब्राह्मणी राजपत्निका' धेनुर्धात्री तथा पृथ्वी सप्तैता मातरः स्मृता इति । पिता जनकः । पारक्षणे धातो स्तृच्। 'तातस्तु जनकः पिता' इत्यमरः । राजानं दिलीपं प्रति पितृदृष्टिर्यथा कालिदासस्यरघुवंशे महाकाव्ये (१/२४)- 'प्रजानां विनायाधानाद् रक्षणाद्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भरणादपि' स पिता पितरस्तेषां केवलं जन्महेतवः' इति 'अन्नदाता भयत्राता विद्यादाता तथैव च। जनिता चोपनेताश्च पञ्चैते पितरः स्मृताः' वा चार्थेप्रयुक्तः। भ्रातृसुताद्यो भ्रातरश्च सुताश्च त आदय इति तथोक्ताअनुजपुत्रादयः। भ्रातारश्च सुताश्च त आदय इति तथोक्ता अनुजपुत्रादयः। भ्राता-भ्राजृदीप्तौ धातोस्तृ च्। 'भ्रातृभगिन्यौ भ्रातरावुभौ' इत्यमरः । भ्रातृप्रेम यथाऽध्यात्मरामायणे (२/९/७) 'रामस्तमाकृष्यसुदीर्घबाहुर्दोर्भ्यां परिष्वज्य सिषिञ्च नेत्रजैः। जलै रथाङ्कोपरिसंन्यवेशयत्। पुनःपुनः संपरिषस्वजे विभुः ।।' इति। सुतः - सुप्रसवैश्वर्ययोर्धातोःक्तः। 'आत्मजस्तनयः सूनुः सुतः पुत्रः' इत्यमरः। सुतवात्सल्यं यथा रघवंशे (३/१७)- 'निवातपद्मस्तिमितेन चक्षुषा नृपस्य कान्तं पिवतः सुताननम्। महोदधेः पूर इवेन्दुदर्शनाद् गुरुः प्रहर्षः प्रबभूव नात्मनि ।।' इति। स्वामीशिता स्वशब्दान्मिनि-प्रत्ययोदीर्घश्च 'स्वामीत्वीश्वरः पतिरीशिता' इत्यमरः। स्वामिभावेन कृष्णाराधनं यथा शिवप्रकाशस्य कृष्णाद्भुतस्तोत्रे- 'क्वाऽयं क्षुद्रमतिर्दासः क्व स्वामी गुणवारिधिः, मुहुर्मुहुर्निमग्नं मां क्षमस्व करुणानिधे' इति। सखा मित्रम्। सह समानं ख्यायत इति सखा। ख्यातर्डिन् निपातनम्। 'अथ मित्रं सखा सुहृत्' इत्यमरः। सख्युर्लक्षणं यथा- अत्यागसहनो बन्धुः सदैवानुमतः सुहृत्' एकक्रियं भवेन्मित्रं समप्राणः सखा स्मृतः, इति सेवकवृन्दं सेवकाना मनुचराणां वृन्दं समूह इति तथोक्तम्। सेवकः- षेवृ धातोर्ण्वुल। 'सेवकार्थ्यनुजीविनः' इत्यमरः। सेवा माहात्म्यं यथा श्रीमद्भागवते (५/५/२)- 'महत्सेवां द्वारमाहुर्विमुक्तेः' इति। रामसेवकेन हनूमता। कृतानि कार्याणि यथा श्रीजयदेवकृत रामगीतगोविन्दे- 'तीर्त्वा क्षारपयोनिधिं क्षणमथो गत्वा श्रियः सन्निधौ दत्वा राघवमुद्रिकामपशुचं कृत्वा प्रविश्याटवीम्। भङ्क्त्वाशेषतरून्निहत्य बहुशो रक्षो गणांस्तत्पुरीं दग्ध्वाऽऽदाय मणिं रघूत्तममगाद्वीरो हनूमान् कपिः' इति। आप्ताः प्रत्ययितजनाः। आप्लृ व्याप्तौ धातोःक्तः। 'आप्तः प्रत्ययितौ समौ' इत्यमरः। आप्तो यथार्थवक्ता' इति तर्कसंग्रहः। पतिर्भर्ता, पारक्षणे धातोर्डति प्रत्ययः। 'धवः प्रियः पतिर्भर्ता' इत्यमरः। पतिप्रभुतां द्योतयति कालिदासो यथाऽभिज्ञान शाकुन्तले (५/

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

२६) 'तदेषा भवतः कान्ता त्यज वैनां गृहाण वा । उपपन्ना हि दारेषु प्रभुता सर्वतोमुखी ।।' इति । कलत्रं पत्नी, गड सेचने धातोरत्रन्, गकारस्य ककारः, डलयोरभेदात् कलत्रम् 'कलत्रं श्रोणिभार्ययोः' इत्यमरः । 'यद् भर्तुरेवहित-मिच्छति तत्कलत्रम्' इति सूक्तिः । नृपतिर्नृणांपतिर्नृपतिर्नृपालः । 'राजा राट्-पार्थिवक्ष्माभृन्नृपभूपमहीक्षितः' इत्यमरः । राज्ञो लोकप्रियतां दर्शयति भवभूतिर्यथोत्तरराम चरिते- स्नेहं दयां च सौख्यं च यदि वा जानकीमपि । आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा' इति वा चार्थे प्रयुक्तोऽत्रापि । प्रजाः प्रकृतिः, प्रोपसर्गपूर्वकाज्जनधातोर्डप्रत्ययष्टाप् च । प्रजा स्यात् सन्ततौ जने' इत्यमरः । राजसहयोगार्थं प्रजानां जागरा यथा मम महेन्द्रोदये महाकाव्ये (४/११-१२) 'ततो निरुद्धे सदने सुशासके कुशासकेनाऽदयशासिताः प्रजाः। विबुध्यदेशेशमनः कथञ्चन विधातुमस्मै सहयोगमुत्थिताः ।।११।। पुरे प्रजानां परिषद्रहस्यथ प्रजाभिरेका विहिताबृहत्तमा । इयं हि दैत्यक्षतये स्वशक्तिभीरराज दुर्गेव दिवौकसां युता ।।१२।।' इति । स्वं स्वमात्मकमात्मकम् । 'नित्य वीप्सयोः' इति वीप्सायां द्विरुक्तिः । सदाचारं सदाचरणं कर्त्तव्यकर्मेत्यर्थः, इतो रामायणात् । अजानन्नविन्दन् । हीतिनिश्चयार्थप्रतिपादने । मातरः कौशल्यायाश्चरितात्, पितरो दशरथस्य चरितात्, भ्रातरो भरतादि चरितात्, पत्न्यः सीतायाश्चरितात्, प्रजाः साकेतनिवासिजनानां चरिताच्छिक्षामल-भन्तेतिभावः ।।२५।।

देशोन्नतेरेव निदानभूतं
चात्मोन्नतेः साधनरूपमेकम् ।
स्वसंस्कृतेश्चावनयोनिरम्यं
रामायणं को न पपाठ भानोः ।।२६।।

आफ्नो देशको उन्नतिको नै मूल कारण, आफ्नो उन्नतिको एक मात्र साधन, आफ्नो संस्कृतिको रक्षाको मूल, अत्यन्त राम्रो, भानुभक्तको रामायण कसले पढेन ?

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

देशोन्नतेर्देशस्य स्वदेशस्य नेपालस्येत्यर्थः । उन्नतिरभ्युदयस्तस्या एव हि । निदानभूतमादिकारणभूतम् । 'निदानंत्वादिकारणम्' इत्यमरः । आत्मोन्नतेश्चात्मन उन्नतिस्तस्याः स्वाभ्युदयस्याऽपि । एकमेकमात्रम् । साधनरूपं कारणरूपम् । स्वसंस्कृतेरात्मसंस्कारस्य च । अवनयोनि रक्षणमूलम् । रम्यं सुन्दरम् भानोर्भानुभक्ताचार्यस्य । रामायणं तन्नामग्रन्थम् । को न पपाठ को नाम नाऽध्यैष्ट । सर्व एव पेठुरितिभावः ॥२६॥

यन्त्रालये भारतजीवनाख्ये
वसन् पदे मुद्रणकार्यलग्नः ।
स गोरखाभारतजीवनाख्या
मचालयत् प्राञ्जलपत्रिकां च ॥२७॥

'भारत जीवन' नामक छापाखानामा पदासीन भएर छाप्ने काममा लाग्दा तिनले 'गोरखा भारतजीवन' नाम गरेको निष्पक्ष नेपाल पत्रिका चलाए ।

यन्त्रालय इति । भारतजीवनाख्ये भारतजीवनमाख्या यस्य तस्मिन् । 'भारतजीवन' नामधेये यन्त्रालये मुद्रणयन्त्रशालायाम् । पदे सञ्चालकपदे। वसंस्तिष्ठन् । अत एव मुद्रणकार्यलग्नो मुद्रणमेव यत्कार्यं कर्म तस्मिंल्लग्नः। स मोतिरामः। गोरखाजीवनाख्यां गोरखाजीवननाम्नीं प्राञ्जलपत्रिकां स्वच्छपत्रिकां निष्पक्षपत्रिकामिति भावः । अचालयच्चालितवान् ॥२७॥

नासीदृते शास्तुरिहेतरस्य
ग्रन्थो गुरुर्जैवनवृत्तनद्धः ।
अमुद्रयत् साहसिकः स एव
भानोः कवेर्जीवनपुस्तकं च ॥२८॥

यस देशमा शासक बाहेक अरु कसैको जीवन चरित्र लेखिएको महत्त्वपूर्ण ग्रन्थ थिएन । तर तिनले साहस गरेर भानुभक्त कविको जीवन चरित्रको एउटा

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पुस्तक छपाइदिए ।

नेति । इहाऽस्मिन् देशे । शास्तुर्ऋते प्रशासकादतिरिक्तम् । 'अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्त' इति पञ्चमी । इतरस्याऽन्यस्य। शासकेतरजनस्येत्यर्थः । साधारणजनस्येतिभावः, जैवनवृत्तनद्धो जीवने जीविते भवानि जैवनानि 'तत्र भवः' इत्यण्: । तानि च तानि वृत्तानि चरितानि तैर्नद्धोबद्धः । गुरुर्महान् महत्त्वपूर्ण इत्यर्थः । ग्रन्थः पुस्तकम् । नाऽऽसीत् । नाऽभवत् । साहसिकः साहसेन चरतीति साहसिकः ससाहसः समनोबल इत्यर्थः । स एव मोतिरामो हि । भानोर्भानुभक्ताभिधानस्य कवेः काव्यकार स्य । जीवनपुस्तकं जीवनचरित्रपूर्णग्रन्थं च । न केवलं पत्रिकां कविजीवन चरित्रपुस्तकमपीत्यर्थः। अमुद्रयन्मुद्रणमानयत् ।।२८।।

श्रुत्वा हरिश्चन्द्रकवेः कवित्वं
गाङ्गे मनोहरिणि वारिणीह ।
लिलेख रुच्याः कविताः सुमेधा
गङ्गोरसि प्राक्सवितेव रेखाः ।।२९।।

काशीमा गङ्गाजीको मनोहर जलप्रति लेखेका कवि हरिश्चन्द्रका कविता सुनेर, प्रभाती सूर्यले गङ्गाको छातीमा किरण छरेझैं, तिनको जलसतहको विषयमा ती प्रतिभाशाली मोतीरामले धेरै कविता लेखे ।

श्रुत्वेति । इह काश्याम् । मनोहारिणि मनोज्ञे । गाङ्गे गङ्गाया भवं गाङ्गं जाह्नवीयं तस्मिन् । 'तत्र भवः' इत्यण् । वारिणि जले । जलं प्रतीत्यर्थः 'आपः स्त्री भूम्नि वार्वारिसलिलं कमलं जलम्' इत्यमरः । हरिश्चन्द्रकवेस्तन्नाम्नः कवेः । कवित्वं कविताम् । जल प्रवाहशोभां निरीक्ष्य लिखितां कवितामित्यर्थः, श्रुत्वाऽऽकर्ण्य । सुमेधाः प्रतिभाशाली । मोतिराम इत्यर्थः, प्राक्सविता प्राक् चासौ सविता प्राक्सविता प्रथमसूर्यो बालसूर्य इत्यर्थः ।' भानुर्हंसः सहस्रांशुस्तपनः सविता रविः' इत्यमरः, गङ्गोरसि गङ्गाया भागीरथ्याउरो

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वक्षस्तस्मिन् । रेखाः किरणलेखा इव । गङ्गाजलं प्रतीत्यर्थः, गङ्गायां घोषवदवगम्यः। रुच्या रम्याः। 'कान्तं मनोरमं रुच्यं मनोज्ञं मञ्जुमञ्जुलम्' इत्यमरः। कविताः श्लोकान् लिलेख रचयामास, हरिश्चन्द्रस्य कविताया उपमाभावान्मोतिरामस्य कविताभ्य उपमादानादस्य कवितास्तदधिकतरा मनोहरा इति व्यज्यते। स कवित्वेन भारतेन्दुं हरिश्चन्द्रं जिगायेत्याशयः, गङ्गोर्मि विषये तत्कवितानां गङ्गोरसि पतितानां बालसवितुः किरणानां च साम्येनोपमालङ्कारः ।।२९।।

दिवं हरिश्चन्द्रमितं स जातु
दृष्ट्वै व भूतो नु गतासुराशु ।
न स्याद् द्वितीये भुवि जीविते वा
मृतिं गते जीवनधारणेहा ।।३०।।

कुनै दिन हरिश्चन्द्र स्वर्ग भएको देखेर तिनी तुरुन्त प्राण गएजस्ता भए अथवा दोस्रो प्राण नै साथी स्वर्ग्य भइसकेपछि, पृथ्वीमा बाँच्ने इच्छा नै किन होला र !

दिवमिति । स कविः, जातु कदाचित् । हरिश्चन्द्रं भारतेन्दुम् । दिवं स्वर्गम् । इतं प्राप्तं मृतमित्यर्थः, दृष्ट्वाऽवलोक्यैव आश्वविलम्बितंयथा तथा 'सत्वरं चपलं तूर्णमविलम्बितमाशु च' इत्यमरः । गतासुर्गता असवोयस्य सः, निर्गतप्राणः, भूतो बभूवन्वित्युत्प्रेक्षायाम्, वाऽथवा । द्वितीये शरीरत्वेनैव द्वितीये, जीविते जीवने, जीवनतुल्य इत्यर्थः, मृतिं मृत्युं गते याते मृते सतीत्यर्थ 'यस्य च भावेन भावलक्षणम्' इति सप्तमी, भुवि पृथिव्याम् । जीवनधारणेहा जीवनस्ययद्धारणं तस्मिन्नीहेति जीवनधारणेहा प्राणरक्षेच्छा 'इच्छाकाङ्क्षास्पृहेहा तृड् वाञ्छालिप्सा मनोरथः' इत्यमरः। न स्यान्नभवेत्। कोऽपि जीवितुं नेच्छेदित्यर्थः, अत्रश्लोके पूर्वार्द्ध उत्प्रेक्षालङ्कारः, उत्तरार्द्धेऽर्थान्तरन्यासोलङ्कारः । ततः संसृष्टिरलङ्कारश्च ।।३०।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तरोरधस्तादथ नातिदूरे
जीर्यद्दले पातितदीर्घकायः ।
शार्दूलविक्रीडितशीलकोऽपि
शारङ्गवद् बाणहतोऽश्वसीत् सः ।।३१।।

हरिश्चन्द्रको मृत्युपछि, ती मोतीराम अलिकति परको रुखमुनि सुकेका पातमा शरीर लम्पसार पारेर लडे, बाघको खेलजस्तो तिनको चालढाल भएतापनि अथवा शार्दूलविक्रीडित छन्दमा कविता लेख्ने स्वभावका भएतापनि, बाण लागेको मृगजस्तै स्वाँ स्वाँ गरेर सास फेरिरहे ।

तरोरिति । अथ हरिश्चन्द्रमृत्योरनन्तरम् । नातिदूरे निकट एव, हरिश्चन्द्र-भवनान्निकट एवेत्याशयः । तरोर्वृक्षस्याधस्तादधः, जीर्यद्दले शुष्कपत्रे शुष्कपत्रराशावित्यर्थः, पातितदीर्घकायः' पातितः स्खालितदीर्घ आयतः कायो देहो येन सः 'कायो देहः क्लीवपुंसोः' इत्यमरः । स कविः, शार्दूलविक्रीडित-शीलकोऽपि शार्दूलस्य व्याघ्रस्य विक्रीडितं खेलनमिव शीलः प्रकृतिर्यस्य स शार्दूलविक्रीडितशीलः स एव तथोक्तः' स्वार्थेकन् । वीरस्वभावोऽपीत्यर्थः, वाऽथवा' शार्दूलविक्रीडिते तन्नामछन्दसि शीलो यस्य सः, कविरपीतिभावः, बाणहतः शरविद्धः, शारङ्गवच्शारं शवलमङ्गं यस्य स शारङ्गः शारङ्ग इव शारङ्गवद्धरिण इव । 'तेन तुल्यं क्रिया चेद्वतिः' इति वतिप्रत्ययः, अश्वसीच्छ्वा-समुञ्चत् । ञिष्वप् शये धातोर्लुङ् । अत्रश्लोक उपमाश्लेषश्चालङ्कारौ ।।३१।।

द्रष्टुं दिशः शेकतुरक्षिणी नो
न वाग्विसर्गं रसना चकार ।
अन्तर्निरुद्धाश्रुकणः स मेने
ह्यात्मानमेकाकिनमत्र लोके ।।३२।।

आँखाले कतै हेर्न सकेनन्, न त जिभ्रोले नै बोली निकाल्यो । भित्रभित्रै आँशु रोकिएका तिनलाई यस संसारमा आफू एक्लै छु भन्ने मात्र लाग्यो ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्रष्टुमिति । अक्षिणी नेत्रे । दिशः ककुभः, द्रष्टुं विलोकयितुम् । नशेकतुर्न प्रबभूवतुः, रसना जिह्वा वाग्विसर्गं वाणिमोचनम् । न चकार । न व्यधात्, अन्तर्निरुद्धाश्रुकणोऽन्तरन्तराले निरुद्धा अवरुद्धा अश्रुकणा वाष्पलवा यस्य सः । स मोतिरामः, अत्रलोकेऽस्मिञ्जगति, आत्मानं स्वम्, एकाकिनं ह्येकमात्रम्। मेनेऽमन्यत ।।३२।।

तं भारतीयं सुहृदं विमुच्य
म्लानश्रियं साचिवशासनेन ।
उद्धर्तुमूर्वीं प्रभवेत् कथं स
जिजीविषापीव मृता बभूव ।।३३।।

ती भारतीय मित्रलाई छोडेपछि, मन्त्रीको प्रशासनले श्री वैलाएकी धर्तीको उद्धार गर्न उनी कसरी समर्थ होलान् । अत एव तिनको बाँच्ने इच्छा पनि मरेजस्तै भयो।

तमिति । स मोतिरामः, तं पूर्वोक्तम्, भारतीयं भारतदेशीयम्, सुहृदं मित्रम्, विमुच्य त्यक्त्वा, साचिवशासनेनमन्त्रिशिष्ट्याम्लानश्रियं म्लाना मलिना श्रीः शोभा यस्यास्ताम् । ऊर्वी पृथ्वीम्, नेपालदेशमित्यर्थः उद्धर्तु मुन्नेतुम् । कथं केन प्रकारेण प्रभवेत् समर्थो भवेत् । जिजीविषा जीवितुमिच्छा जिजीविषा सन्नन्ताद् टाप्। प्राणधारणेच्छाऽपि । मृता निष्प्राणा शक्ति हीनेत्यर्थः । बभूव, इवोत्प्रेक्षायाम् ।।३३।।

हृद्यानि पद्यानि बहूनि मैत्र्याः
कवीश्वरः कारुणिकानि कृत्वा ।
विवेश दुःशिष्टिगतात्ममूल्यं
स आत्मदेशं परदेशतुल्यम् ।।३४।।

ती उत्तम कवि मित्रको सम्झनाले करुणरस प्रधान सुन्दर कविताहरू रचेर

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दुःशासनवश मूल्य गुमेको अत एव अर्काको देशजस्तो आफ्नो देशमा प्रवेश गरे ।

हृद्यानीति । कवीश्वरः कविषूत्तमः । कवि श्रेष्ठः, स मोतिरामः, मैत्र्या मित्रताया हेतोः, हेतौ पञ्चमी, हृद्यानि हृदयजातानि चेतोहराणि वा, कारुणिकानि करुणरसप्रधानानि । बहूनि प्रचुराणि, पद्यानि श्लोकान् कृत्वा विरचय्य । कवीश्वरं इत्यत्रेश्वरविशेषणदानकारणं करुणरसे कवितालेखनशीलनत्वात्। रसेषु करुणरस एव प्रधान 'एको रसः करुण एव' इत्युक्तेः दुःशिष्टिगतात्ममूल्यं दुष्टा दोषयुक्ता या शिष्टिः प्रशासनं तया गतं नष्ट मात्ममूल्यं स्वमहत्त्वं यस्यतम्। 'शिष्टिश्चाज्ञा च' इत्यमरः, अत एव परदेशतुल्यं विदेशनिभम् । आत्मदेशं स्वदेशं नेपालमित्यर्थः, विवेश प्राविशत् ।।३४।।

ददर्श शुभ्रोच्चगिरेरधः सः
राणाग्रहग्रस्तमहीन्दुलेखाम् ।
यतो जनानां भुवि नष्ट मासीत्
कर्माधिकारग्रहणायशास्त्रम् ।।३५।।

तिनले अल्को र उज्यालो पहाड मुन्तिर राणा रूपीग्रहणले खाएको पृथ्वीरूपी चन्द्रमालाई देखे, जसबाट राज्यमा काम र अधिकार लिनका लागि कानून वा कर्माधिकारको लागि शास्त्र नष्ट भएको थियो ।

ददर्शेति । स कविः, शुभ्रोच्चगिरेः शुभ्रश्चोच्चश्च शुभ्रोच्च एतादृशो यो गिरिस्तस्य, विशेषणयोरपि कुपाणिखञ्जवदैच्छिकोपसर्जनत्वविवक्षया विशेषणसमासः । हिमालयस्येत्यर्थः, उज्ज्वलोन्नतस्थितेस्तमोऽवनत्य-भावसम्भवाद्विशेषणद्वयम् । अधोऽधस्तादङ्क इत्यर्थः । राणाग्रहग्रस्तमहीन्दुलेखां राणा एव ग्रहो राहुस्तेन ग्रस्ताऽऽक्रान्ता या मही पृथ्वी सैवेन्दुलेखा चन्द्ररेखा तां तथोक्ताम् । यतो यद्ग्रहणात् । भुवि पृथ्व्यां राज्य इत्याशयः, जनानां लोकानाम् । कर्माधिकारग्रहणाय कर्म च क्रिया चाऽधिकारश्चाऽधिकृतिश्च कर्माधिकारौ तयोर्ग्रहणमादानं तस्मै, तादर्थ्ये चतुर्थी, शास्त्रं देशप्रशासनायविहित-

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नीतिनियमादिर्वा धर्मस्मृतिः नष्टं लुप्तमासीत् कुटिल प्रशासनत्वाद् वा चन्द्रग्रहणे कतिपय कर्मणां निषेधात् । अत्र रूपकः श्लेषश्चालङ्कारौ ।।३५।।

शवोपमं जीव इव स्वदेशं
प्रत्यागतः सन् सुखयन् जनौघम् ।
मनोज्वरं सप्रसभं नियम्य
भाषां समुद्धर्तुमलं बभूव ।।३६।।

जीवजस्ता तिनी मुर्दाजस्तो आफ्नो देशमा सबमा सुख सञ्चार गर्दै फर्किए, मनको ज्वरोलाई जबर्जस्ती रोकेर भाषाको उद्धार गर्न पर्याप्त समर्थ पनि भए ।

शवोपममिति, जीव इवाऽऽत्मेव चैतन्यमिवित्यर्थः स मोतिरामः, शवोपमं शवो मृतदेह उपमा सादृश्यं यस्य तम् । 'तथा स देशोऽपि शवोपमोऽस्ति, न यत्र काव्यस्य दिनोदयश्रीः' इत्युक्त्यनुसारं काव्यशोभारहितमिति भावः, स्वदेशमात्मजनपदं नेपाल देशमित्यर्थः, जनौघं जनताम् । सुखयन् सुखसञ्चारं कुर्वन् सन्' प्रत्यागतो निवृत्तो बभूव । यथा मृतदेहेजीवे पुनरागते जनाः सुखमनुभवन्ति तथा मोतिरामे स्वदेशे प्रत्यावृत्ते सर्वे देशवासिनः प्रसन्ना बभूवुरितिभावः, मनोज्वरं मानसव्यथाम् । नियम्य संयम्य, भाषां नैपालिकीं भाषाम् । समुद्धर्तुमुन्नेतुम् अलं बभूव समर्थोऽभूत् । 'अलं भूषणपर्याप्ति-शक्तिवारण वाचकम्' इत्यमरः, अत्रोपमालङ्कारः ।।३६।।

यन्त्रालयं मुद्रणकर्मणेऽथो
संस्थापयामास स धीरचित्तः ।
तत्स्थापनं निर्भरनिद्रितेषु
जागर्तिबीजस्य निधानमासीत् ।।३७।।

यसपछि चित्त स्थिर भएका तिनले छपाउने कामको लागि छापाखाना राखे । त्यो राख्नु नै अबोधहरूमा बोधको बीजाधान गर्नु थियो ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यन्त्रालयमिति । अथोऽनन्तरम् । धीरचित्तः स्थिरचेताः, स मोतिरामः, मुद्रणकर्मणे मुद्रणमेव कर्मतस्मै, पत्रपत्रिका पुस्तकपुस्तिकामुद्रणार्थम् । तादर्थ्ये चतुर्थी, यन्त्रालयं यन्त्रशालाम्, संस्थापयामास निधारयामास, मुद्रण यन्त्र-स्थापनमकरोदितिभावः, तत्स्थापनं तन्निर्धारणम् निर्भर निद्रितेषु निर्भरमत्यर्थं यथा तथा निद्रिता निद्रां गता अबोधा इत्यर्थः, तेषु तथोक्तेषु, जागर्तिबीजस्य जागर्तिर्जागरैव बोध एवेत्यर्थः, यद्बीजं वपनयोग्यकणस्तस्य निधानं वपनम्, आसीत् ।।३७।।

अनूदितौ भागवतादनेन
प्रह्लादभक्तिश्च गजेन्द्रमोक्षः ।
काव्यं मनोज्ञं 'पिकदूत' संज्ञं
चान्यानि रम्याण्यनुमुद्रितानि ।।३८।।

यिनले श्रीमद्भागवतबाट अनुवाद गरेको प्रह्लादभक्ति कथा, गजेन्द्रमोक्ष र यिनका आफ्नै कपोलकल्पित 'पिकदूत' नामक काव्य छापिए र अरू पनि पछि छापिए ।

अनूदिताविति । अनेन कविना, भागवतात् श्रीमद्भागवतमहापुराणात्। अनूदितौ रूपान्तरितौ, प्रह्लादभक्तिर्गजेन्द्रमोक्षश्च तन्नामकौ ग्रन्थौ, मनोज्ञं सुन्दरम्, पिकदूतसंज्ञम् । 'पिकदूत' इति संज्ञा नाम यस्य तत् तथोक्तम् । काव्यं खण्डकाव्यं मुद्रितमित्यध्याहार्यम् । रम्याणि सुन्दराणि अन्यान्यपराणि च काव्यानि । अनुमुद्रितानि पश्चान्मुद्रणमानीतानि, तन्मृत्योः पश्चान्मुद्रितानीति भावः अभवन्निति शेषः ।।३८।।

नाम्ना 'मनोद्वेग प्रवाह' एकं
विनिर्ममौ संग्रहमेष पाद्यम् ।
यस्मिन्निवाऽभान्मनसस्तरङ्गाः
कवित्वमातङ्गमदेच्छुभृङ्गाः ।।३९।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यिनले 'मनोद्वेग प्रवाह' नाम भएको एउटा पद्य संग्रह बनाए, जसमा मनका तरङ्गहरू कवितारूपी हस्तिमद (मत्तहात्तीको गालामा चुहुने रस) का इच्छुक भँमरा जस्ता शोभित हुन्थे ।

नाम्नेति । एष कविः, नाम्ना 'मनोद्वेगप्रवाहः' मनोद्वेगप्रवाह नाम धेयम् । मनोद्वेग इत्यत्र सन्धावशुद्धिर्दृश्यते परं नैपालिक्या भाषाया हेतोर्ना-ऽशुद्धिः। एकमेककम् । पाद्यं पद्ये भवं पाद्यम् 'तत्रभवः' इत्यण्, श्लोकात्मकम्। संग्रहं सङ्कलनं पद्यसंग्रहमित्यर्थः, विनिर्ममौ विरचयामास, यस्मिन् यत्र पद्यसंग्रहे मनसश्चेतसः, तरङ्गा भावनाः, कवित्वमातङ्गमदेच्छुभृङ्गाः कवेर्भावः कवित्वं कविता 'तस्य च भावस्त्वतलौ' यति त्वल्। तदेव मातङ्गमदो नागदानम् । 'गजेऽपि नागमातङ्गः' इति । 'मदोदानम्' इत्युभयत्राप्यमरः । तस्येच्छवो-ऽभिलाषिणः, 'विन्दुरिच्छुः' इतीषेश्छत्वमुश्च' एतादृशाभृङ्गा भ्रमरा इति तथोक्ताः। इव यथाऽभानशोभन्त । 'कवित्वमातङ्गमद' इत्यत्र रूपकम्, 'तरङ्गा भृङ्गा इव' इत्यत्रोपमा च ।।३९।।

'उषाचरित्रं' 'कमलालिवादं'
'गफाष्टकं' नीतिकदर्पणञ्च ।
'पञ्चप्रपञ्चं' 'शकुनौति' खण्ड-
काव्यानि चक्रे स मनोहराणि ।।४०।।

उनले 'उषाचरित्र', 'कमलभ्रमरसंवाद', 'गफाष्टक', 'नीतिदर्पण', 'पञ्चक-प्रपञ्च' र शकुनौती आदि मनोहर खण्डकाव्यहरू पनि बनाए ।

उषेति । स मोतिरामः, 'उषाचरित्रं' तन्नामकम् । कमलालिवादं 'कमल भ्रमरसंवाद' नामकम् । 'गफाष्टकं' तन्नामकम्, संस्कृते वार्ताष्टकंभवति, नीतिकदर्पणं 'नीतिदर्पण' नामकम्, पञ्चप्रपञ्चं 'पञ्चकप्रपञ्चनामकम् । शकुनौति शकुनौति नामकम्, संस्कृते शुभाशुभसांकेतिकं भवति, इत्यादीनि मनोहराणि रम्याणि खण्डकाव्यकानि लघुकाव्यानि चक्रे चकार ।।४०।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शकुन्तला च प्रियदर्शिका च
पद्मावती चाऽस्य सुनाटिका याः ।
नामुद्रणाद् दृष्टिपथं गता स्ताः
क्वचिद् भवेत् पाण्डुलिपिस्तदीया ।।४१।।

'शकुन्तला' भो, 'प्रियदर्शिका' भो, 'पद्मावती' भो, कुनै पनि यिनले बनाएका राम्रा नाटकहरू नछापिएका हुनाले देखिन आएका छैनन्, तिनीहरूको पाण्डुलिपि कतै होला ।

शकुन्तलेति । 'शकुन्तला च तन्नामी च' प्रियदर्शिका' च तन्नाम्नी च' पद्मावती च । तन्नाम्नी च । अस्य मोतिरामस्य याः सुनाटिकाः सुलधुनाटकानि, आसन्नित्यध्याहार्यः, ता नाटिकाः, अमुद्रणादप्रकाशनाद्धेतोः, दृष्टिपथं नयनगोचरं न गता नयाताः तदीया तासामियं तदीया तत्सम्बन्धिनी । पाण्डुलिपिर्हस्त लिखितपुस्तिका, क्वचित् कस्य चिद्गृहे वा कुत्रचित् पुस्तकालये भवेत्।।४१।।

'मल्लोचनं चञ्चति यत्र यत्र
रामः प्रियो मेऽस्ति हि तत्र तत्र'
इत्यस्य गीतिं सुजना जगुर्या
गायन्ति गास्यन्ति च भूरिभूरि ।।४२।।

'जता हेऱ्यो उतै मेरा नजरमा राम प्यारा छन्' यिनको यो गजल त्यसबेला सज्जनहरूले निकै गाए, अहिले पनि गाउँदैछन् र पछि पनि धेरै धेरै गाउलान् ।

मदिति । मल्लोचनं मम लोचनं नयनमिति मल्लोचनम् । यत्र यत्र यस्मिन् यस्मिन् स्थले । 'नित्य वीप्सयोः । इति वीप्सायां द्विरुक्तिः । चञ्चति गत्यर्थकाच्चञ्चतेर्लट् गच्छति । तत्र तत्र तस्मिं स्तस्मिन् स्थले । यत्रतत्रेत्यत्र 'सप्तम्यास्त्रल्' इति त्रल् । मे मम । प्रियोऽभीष्टः सततं हृदयकुहरे निहित

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इत्यर्थः । रामो रमन्ते योगिनो यस्मिन्निति रामः श्रीरामचन्द्रः । रामनामार्थं द्योतयति महामुनिर्वेदव्यासो यथाऽध्यात्मरामायणे (१/३/४०) 'यस्मिन् रमन्ते मुनयो विद्यया ज्ञानविप्लवे तं गुरुः प्राह रामेति रमणाद्राम इत्यपि' इति । यथाजनकनन्दिनी सीता कथयति हनुमन्तं तत्रैव (१/१/४३) ।

'रामो नगच्छति न तिष्ठति नानुशोचत्याकाङ्क्षते त्यजति नो नकरोति किञ्चित् । आनन्दनुमूर्तिरचलः परिणामहीनो मायागुणाननुगतो हि तथा विभाति' इति । अस्ति हि वर्तत एव दृश्यत इत्यर्थः । प्रियशब्द प्रयोगान्मोतिरामे रामभक्तिर्ज्ञानाद्गरीयसीत्यपि व्यज्यते । अस्य मोतिरामस्य । इतीत्थं गीतिं गानम् 'गीत गानमिमे समे' इत्यमरः । सुजनाः सज्जनाः, जगु र्गानमकुर्वन् । गैशब्दे धातोर्लिट् यां गीतिम् । गायन्ति गानं कुर्वन्ति वर्तमानसमये । भूरिभूरि भृशंभृशम् । भृशार्थेद्विरुक्तिः ! गास्यन्ति च गानं करिष्यन्ति च भविष्यति-काले ॥४२॥

एवं व्यतीयाय वयोऽभिरामं
स त्रिंशवर्षं च समाविवेश ।
परन्तु पद्मे हिमपातकल्पो
देहे तदीये निपपात रोगः ॥४३॥

उनले यसरी क्रमशः सुन्दर नवयौवन बिताएर तीसौं वर्षमा प्रवेश गरे, तर कमलमा हिउँ परेजस्तै उनको शरीरमा रोग लाग्यो ।

एवमिति । स मोतिरामः । एवमित्थंप्रकारेण । अभिरामं सुन्दरम् । वयो यौवनदशाम् । व्यतीयाय विशेषेण यापयामास । व्युपसर्गपूर्वकात् 'इण गतौ' धातोर्लिट् । त्रिंशवर्षं च त्रिंशश्चासौ वर्षस्तम् । दशाधिकविंशवर्षम्। समाविवेश प्रविष्टः परन्तु किन्तु । पद्मे कमले । हिमपातकल्पस्तुषार पाततुल्यः। 'ईषदसमाप्तौ कल्पब्देश्यदेशीयरः' इति कल्पप्रत्ययः । रोगो रुक् तदीये

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तस्य मोतिरामस्याऽयं तदीयस्तस्मिन् । देहे शरीरे निपपात नितरां पपात निपपात प्राऽस्खलत् । तच्छरीरं रोगग्रस्तं बभूवेतिभावः ।।४३।।

रुजाक्रान्तश्चास्तं गमितनिजशक्तिस्तनुरुचं
ग्रहग्रस्तस्येन्दोरिव मलिनकान्तिं परिवहन् ।
अरौत्सीद् दृङ्नीरं प्रतिवचनरुद्धाक्षरगिराऽ
मरत्वं सन्दर्श्यात्मन उरु जनन्याः कविरसौ ।।४४।।

रोगले पीडित अतएव शक्ति गुमेका, ग्रहणका चन्द्रमाको मलिन कान्तिजस्तो शरीरको शोभा भएका, यी कविले बीचबीचमा अड्केको बोलीबाट आत्माको ठूलो अमरत्व देखाएर आमाको आँसु रोके ।

रुजेति । रुजा रोगेण 'स्त्री रुग्रुजा चोपतापरोग व्याधि गदामयाः' इत्यमरः। आक्रान्तः संव्याप्तः । अस्तंगमितनिजशक्तिश्चाऽस्तंगमिता नाशिता निजशक्ति-रात्मसामर्थ्यं यस्य सः । ग्रहग्रस्तस्य ग्रहेण राहुणा ग्रस्तो ग्रासंनीतस्तस्य । इन्दोश्चन्द्रमसः । मलिनकान्तिमिवम्लानच्छायामिव । तनुरुचं शरीरशोभाम् । परिवहन् संधारयन् । असौ कविः पण्डितः । प्रतिवचनरुद्धाक्षरगिरा वचनं वचनं प्रति प्रति वचनं प्रतिवचनं रुद्धानि गतिहीनान्यक्षराणि वर्णायस्यामिति प्रतिवचनरुद्धाक्षरैतादृशी या गीर्वाणी तया । 'गीर्वाग्वाणी सरस्वती' इत्यमरः। आत्मनः परमात्मनः । उरु विपुलम् 'वड्रोरु विपुलम्' इत्यमरः । अमरत्वं मृतिरहितत्वम् । संदर्श्य सम्यग्दर्शयित्वा । जनन्या मातुः । दृङ्नीरं दृशोर्नयन-योर्नीरं जलम् । अश्रिवतियावत् । अरौत्सीन्निरुद्धवान् रुन्धतेर्लङ् आत्मनोऽमरत्वं प्रतिपाद्य मातुः शोकं व्यपनयदितिभावः । आत्मनोऽमरत्वे यथाऽऽह श्रीकृष्णचन्द्रः श्रीमद्भगवद्गीतायाम् (२/२०) 'न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा नभूयः । अजोनित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे' इति । शिखिरिणीवृत्तं लक्षणं यथा वृत्तरत्नाकरे – रसैरुद्रैश्छिन्ना यमनसभलागः शिखरिणी' इति । अत्र पूर्वाद्ध उपमालङ्कारः ।।४४।।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

न सुतस्य ममास्ति सन्तति-
रिति चिन्तां त्यज मातरान्तरीम् ।
जनमानसमानिताकृतिः
कुलबीजं सुखमातनिष्यते ।।४५।।

आमा ! मेरा छोराको सन्तान भएन भन्ने गहिरो पीर नलिनोस् । जनमानसले मानेको रचनाले नै वंशको कारणबाट हुने सुख दिनेछन् ।

नेति । मातर्जननि ! । मम मे । सुतस्य पुत्रस्य सन्ततिः सन्तानः । नाऽस्ति नविद्यते । इतीत्थम् । आन्तरी मन्तर्वर्तिनीं हृदयस्थामित्यर्थः । चिन्ता माधिम् । त्यज मुञ्च, जनमानसमानिताकृतिर्जनमनस्यादृता रचना । कुलबीजं वंशहैतुकम् । सुखं निर्वृतिम् । आतनिष्यत आसमन्तात् तनिष्यते विस्तारयिष्यते। सुन्दरी वृत्तं, लक्षणं यथा 'विषमे यदि सौ–जगौ समेसभराल्गौ यदि सुन्दरी तदा' इति ।

इति निगदति तस्मिन्नार्यतीर्थेऽन्तकाले
हरिवदनमुपासाप्रीतमाविबर्भूव ।
रघुपतिपदभृत्यो मोक्षधाम्नो वियोगं
प्रहसित मुखमौज्झीत् सोऽथ देहेन साकम् ।।४६।।

– ग्रन्थसमाप्तिः –

अन्त्य वेला आर्यघाटमा यस्तो भनिरहेका तिनका अगाडि सेवाले सधैं प्रसन्न रहेको हरिको मुख (हरिवदन) देखिन आयो । अनि रामका भक्त तिनले चेहरा हँसिलो पारेर पार्थिव शरीर र वैकुण्ठलोकको वियोग यी दुवैलाई त्यागे ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मोतिवृत्तम्

अन्तकाले जीवनान्तसमये । आर्यतीर्थे पाशुपतधामनि । अन्तकाल आर्यतीर्थस्थ प्राप्त्या तस्य सुभागधेयत्वं दृश्यते । तस्मिन् मोतिरामे । इतीत्थं निगदति प्रवदति सति ।' यस्य च भावेन भावलक्षणम्' इति सप्तमी । उपासाप्रीत उपासया सेवया प्रसन्नम् । हरिवदनं नारायणमुखम् । प्रसन्नोनारायणइत्यर्थः । कर्तृ पदमेतत् । आविर्बभूव प्रकटमभूत् । जीवनोत्सर्गवेलायां स हरिदर्शनं प्रापेतिभावः । 'तस्मिन् हरिवदनमाविर्बभूव' इत्यनेन स एव हरिंददर्श न त्वन्ये तन्निकट्वर्तिनो जना इति तात्पर्यम् । तत्पत्न्या हरिवदनोपना-मत्वात् साऽपि तत्समये तत्समक्षमासीदित्यपि ध्वन्यते । अन्तकाले हरिनामोच्चारणमेव मोक्षहेतुः किमुत तद्दर्शनम् । यथा श्रीमद्भगवद्गीतायाम् (८/१३)- 'ओमित्ये-काक्षरं ब्रह्म व्याहरन्मामनुस्मरन्' यः प्रयाति त्यजन् देहं स याति परमां गतिम् ।' इति । यथा च श्रीमद्भागवते (३/३३/३७) 'भगवति कृतधीः सुपर्णकेतावुपनयते भगवत्पदारविन्दे ।' इति उपासाप्रीतत्वमेव हरिदर्शनस्य हेतुत्वम् । अथ हरिदर्शनानन्तरम् । रघुपतिपदभृत्यो रघुपते रामस्य भगवतो विष्णोरित्याशयः । यत्पदंस्थानं वैकुण्ठधामेत्यर्थः, वा चरणः। 'पदं व्यवसित त्राणस्थानलक्ष्माङ्घ्रिवस्तुषु' इत्यमरः । तस्य भृत्योऽनुचरः । एतेन मोतिरामो वैकुण्ठादागत आसीदिति सूच्यते । तस्य प्रकृतिरपि पुण्यलोकादागतस्य जनस्येवासीत् । पुण्यलोकादागतस्य जनस्यलक्षणं यथा- 'सदा प्रसन्नं मुखमिष्टवाणी सुशीलता च स्वजनेषु संख्यम् । सतां प्रसङ्गः कुलहीनहानं चिह्नानि देहे त्रिदिवस्थितानाम्' इति सूक्तिः । स मोतिरामः देहेन साकं शरीरेण सह ।' सहयुक्तेऽप्रधाने' इति सहार्थे तृतीया । मोक्षधाम्नो मोक्षस्य मुक्तेः पुनर्जन्मचक्रवृत्तिमुक्तेरित्यर्थः । धाम पदं विष्णुपदं वैकुण्ठधामेत्यर्थस्तस्य। वियोगं विरहम् । यावद् देहस्तावत् तस्य वैकुण्ठलोकविरहावधिरासी-दतस्तदवधिमिति भावः । प्रहसितमुखं प्रकृष्टं हसितं यस्मिंस्तत् प्रहसितं तच्च तन्मुखं प्रहसितमुखं प्रसन्नाननं यथा तथा । औज्भीदत्याक्षीत् । उज्भ उत्सर्गे धातोर्लुङ् । वैकुण्ठलोकाद् भुवमागतः स पुन स्तत्रैव जगामेतिभावः।'

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यथा श्रीमद्भागवते (३/३३३०)– 'आत्मानं ब्रह्म निर्वाणं भगवन्तमवाप ह' इति। 'वियोगमौज्झीत्' इत्यनेन संयोगबोधात् काव्य संयोगान्तमित्यवगम्यम्! अत्र हरिवदन दर्शनकार्य उपासना प्रीणनहेतुत्वात् काव्यलिङ्गालङ्कारः । मालिनी वृत्तं लक्षणं यथावृत्त रत्नाकरे– "ननमयययुतयं मालिनी भोगिलोकैः" इति।।४६।।

इति भरतराजशर्मघिमिरे मन्थलीय कृतौ मोतिवृत्ते खण्डकाव्ये
पदार्थान्वय बोधिन्यां टीकायामुत्तरार्द्धम् ।

- ग्रन्थसमाप्तिः -

वैशाखपूर्णिमा, बुद्धजयन्ती, २०४१



Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

महेन्द्र-संस्कृत-विश्वविद्यालयका महत्त्वपूर्ण प्रकाशनहरू

	पुस्तक	लेखक/सम्पादक/अनुवादक/टीकाकार/टिप्पणीकार	मूल्य
१.	स्कन्दपुराणस्य अम्बिकाखण्डः	सं. पं. कृष्णप्रसाद भट्टराई	१२५/-
२.	कालचक्रान्तर्गतो ज्योतिषभागः	सं. प्रा. श्रीनयराज पन्त आदि	५०/-
३.	रामराज्यम्	ले. पूर्णप्रसाद ब्राह्मण	२५/-
४.	जनकदर्शनम्	ले. डा. स्वामी रामानन्दगिरि	११५/-
५.	पदार्थीयदिव्यचक्षुः	ले. सुमति उमापति, सं. प्रा. श्रीरामेश्वर शर्मा	४५/-
६.	श्रीस्वर्गद्वारी-महाप्रभुचरित्र	ले. श्री दुर्गादत्त पौड्याल	४५/-
७.	संस्कृतशिक्षणाभ्यासः (प्रथमभागः)	ले. प्रा. श्रीनीलमणि ढुङ्गाना	५२/-
८.	संस्कृतशिक्षणाभ्यासः (द्वितीयभागः)	ले. प्रा. श्रीनीलमणि ढुङ्गाना	७५/-
९.	संस्कृतशिक्षणाभ्यासः (तृतीयभागः)	ले. प्रा. श्रीनीलमणि ढुङ्गाना	/-
१०.	आशौच-विवेचन	ले. प्रा. डा. रामचन्द्र गौतम	७५/-
११.	गण्डकीगौरवम्	ले. पं. उमानाथ पन्थी	३०/-
१२.	श्रीरामचरितामृतम्	ले. पं. दधिराम मरासिनि	५०/-
१३.	साहित्यप्रवेशिका	ले. प्रा. श्रीतीर्थराज सुवेदी आदि	५०/-
१४.	व्याकरणप्रवेशिका	ले. प्रा. श्रीस्थानेश्वर गौतम आदि	१००/-
१५.	तन्त्रचिन्तामणिः (पूर्वभागः)	ले. नवमी सिंह	२९०/-
१६.	नेपाली कविता र ध्वनि सिद्धान्त	ले. प्रा. अम्बिकाप्रसाद अधिकारी	४०/-
१७.	स्थानीय जडिबुटीद्वारा स्वास्थ्य रक्षा	ले. डा. श्याममणि अधिकारी	१२५/-
१८.	गोरखादरबार क्षेत्रको सांस्कृतिकपक्ष	ले. लोकप्रसाद शर्मा भट्टराई	२८५/-
१९.	ब्रह्मसूत्रशाङ्करभाष्यम्- समन्वयाध्यायः नेपालीभाषानुवादसहितः	भाष्यकार-शङ्कराचार्य, अनुवादक पं. मीन-प्रसाद नेपाल	४१५/-
२०.	हरिकेलिनवनीतम्, मञ्जुबोधिनीटीका-विलसितम्	ले. वंशमणिशर्मा टीकाकार- डा. वेणीमाधव ढकाल	६८/-
२१.	गण्डकीमाहात्म्यम्	अनुवादक- डा. टीकाराम अधिकारी	९५/-
२२.	संस्कृतरचनाप्रकाशः - १	ले. प्रा. श्री नीलमणि ढुङ्गाना आदि	८६/-
२३.	संस्कृतरचनाप्रकाशः - २	ले. प्रा. श्री नीलमणि ढुङ्गाना	८६/-
२४.	संस्कृतरचनाप्रकाशः - ३	ले. प्रा. श्री नीलमणि ढुङ्गाना	८६/-
२५.	सुन्दरचरितनाटकम्, यशोदाभिधया संस्कृतटीकयाऽलङ्कृतम्	ले. छविलाल सूरि टीकाकार- प्रा. नीलमणि ढुङ्गाना	९५/-
२६.	अन्त्यकर्मपद्धतिः (नेपालीभाषाटिप्पणीसहिता)	ले. पं. दधिराममरासिनि टिप्पणीकार - श्रीऋषिरामशर्मा घिमिरे	१३२/-
२७.	पं कुलचन्द्र गौतम र उनको साहित्य साधना	ले. डा. टीकाराम अधिकारी	११०/-
२८.	श्राद्धविधिः	सं. श्रीऋषिरामशर्मा घिमिरे, पं. कुलचन्द्र सुवेदी	१३५/-
२९.	विवाहपद्धतिः	सं. श्रीऋषिरामशर्मा घिमिरे	१७२/-
३०.	सौश्रुतनिघण्टुः	सं. डा. काशीराजशर्मा सुवेदी, डा. नरेन्द्रनाथ तिवारी	१२०/-
३१.	श्रीचक्रको उपासना र क्रमदीक्षारहस्य	ले. रथी धनशम्शेर ज.ब.रा., पं. कृष्णप्रसाद भट्टराई	२३०/-
३२.	बृहत् संस्कृत-नेपाली शब्दकोश	फणीन्द्र पाण्डेय	१०००/-
३३.	मोतिवृत्तम्	ले. भरतराजमन्थलीयः	

Jayatu Sanskritam, Kathmandu, Nepal